आरण्यकम् (XXI/2) सितम्बर 2013 ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः 15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः) -श्री देवकुमार मिश्रः 'अलमस्त' 15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा - श्री नर्मदेश्वर ओझा 15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' 35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा 51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा 51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः' 41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य' - श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा 41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा 21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः 60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः 204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

## संस्कृतप्रसारपरिषद्

आरा (विहारः)

संस्कृतप्रसारपरिषद्, आरा (विहारः)
सरस्वती नः सुभगा मयस्करत्

एकविंशं वर्षम्, द्वितीयोऽङ्कः
सितम्बर 2013

## ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।
(क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे,महावीरस्थान,मौलाबाग,आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
(ख) बैंक ड्राफ्ट **‘संस्कृतप्रसारपरिषद्’** इति नाम्ना **‘आरा’ ( विहारः )** नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-‘स्टाम्प’-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. ‘आरण्यक’सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

**संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्**

**वर्षाङ्कौ - एकविंशं वर्षम्, द्वितीयोऽङ्कः**

**आश्विनः, वि.सं.२०७०**

**सितम्बर, २०१३**

संस्कृतप्रसारपरिषद्, आरा (विहार)
सरस्वती नः सुभगा मयस्करत्

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

प्रत्यङ्कम् - २५ रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि
वार्षिकं शुल्कं ५० रूप्यकाणि

**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

⊛

संस्थापकः

**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

⊛

सम्पादकः

**प्रो. गोपबन्धु मिश्रः**

संस्कृतविभागः

काशी हिन्दू विश्वविद्यालयः, वाराणसी

भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)

सोर्बोन नोवेल विश्वविद्यालयः, पारिस (फ्रान्स)

Email-gopabandhuh@gmail.com

⊛

सह-सम्पादकः

**डॉ. सुनीलकुमार प्रधानः**

Email-sunilkumarp435@gmail.com

⊛

प्रकाशिका

**संस्कृतप्रसारपरिषद्**

रामेश्वरलीलासदनम्

महावीरस्थानम्

मौलाबाग, आरा (विहारः) 802301

⊛

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

## सम्पादकीयम्

प्राचीनकथासु विशिष्टवरावाप्तये कठोरतपोवृत्तिः किं च किमपि विशिष्टमनभिलक्ष्य तपोवृत्त्या विशिष्टवरावाप्तिरित्युभयविधानि उदाहरणानि परिलक्ष्यन्ते। कठोपनिषदि यमस्य गृहे तमपेक्ष्य तिस्रः रात्रीः वसतो नचिकेतसः कृते यमः त्रीन् वरान् उद्दिदेश, तद्यथा–

**तिस्रो रात्रीर्यदवात्सीर्गृहे**
**मेऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः।**
**नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु**
**तस्मात् प्रति त्रीन् वरान् वृणीष्व॥** (कठोपनिषद् 1.1.9)

अत्र वरानपेक्षिणे किन्तु तप इव कष्टं सोढ्वा प्रतीक्षमाणाय नचिकेतसे स्वयं यमः वरत्रयं प्राददात्। रामायणे रावणः तीव्रं तपः समाचर्य तत्तपसा सन्तुष्टस्य ब्रह्मणः पक्षतः वरमलभत, तद्यथा–

**स हि तेपे तपस्तीव्रं दीर्घकालमरिन्दमः।**
**येन तुष्टोऽभवद् ब्रह्मा लोककृल्लोकपूर्वजः॥**
**सन्तुष्टः प्रददौ तस्मै राक्षसाय वरं प्रभुः।**
**नानाविधेभ्यो भूतेभ्यो भयं नान्यत्र मानुषात्॥**
(रामायणम् 1.16.4-5)

तेन वरेण अतीव बलिष्ठः दुर्मतिः रावणः सर्वान् लोकान् उदवेजयत् किञ्च देवराजमिन्द्रं प्रधर्षयितुम् ऐच्छत्, तद्यथा–

**त्वया तस्मै वरो दत्तः प्रीतेन भगवंस्तदा।**
**मानयन्तश्च तं नित्यं सर्वं तस्य क्षमामहे॥**
**उद्वेजयति लोकांस्त्रीनुच्छ्रितान् द्वेष्टि दुर्मतिः।**
**शक्रं त्रिदशराजानं प्रधर्षयितुमिच्छति॥**
**ऋषीन् यक्षान् सगन्धर्वान् ब्राह्मणानसुरांस्तदा।**
**अतिक्रामति दुर्धर्षो वरदानेन मोहितः॥**
(रामायणम् 1.15.7-9)

अस्मिन् प्रसङ्गे रावणस्य तपसा ब्रह्मणः तुष्टिः तद्वरप्रदाने हेतुरिति स्पष्टम्। अपरं च, तस्य दुर्धर्षस्य रावणस्योत्पीडनेन उद्विग्नाः ब्रह्मादयः सर्वे सुराः भगवन्तं विष्णुम् अस्तुवन्। सुराणां स्तुत्या सन्तुष्टो विष्णुः तेभ्यो वरमदाद्

यत् सः स्वयं रावणस्य वधाय मानुषं रूपं लोके ग्रहीष्यतीति। केवलं मानुषेण वध्यस्य रावणस्य कृते विष्णुना मानवावतारो ग्रहीष्यते इति देवानां कृते आश्वस्तिवागेवात्र वररूपेण वर्णिता विद्यते, तद्यथा–

**एवं स्तुतस्तु देवेशो विष्णुस्त्रिदशपुङ्गवः।**
**पितामहपुरोगास्तान् सर्वलोकनमस्कृतः॥**

... ... ...

**एवं दत्त्वा वरं देवो देवानां विष्णुरात्मवान्।**
**मानुष्ये चिन्तयामास जन्मभूमिमथात्मनः॥**

(रामायणम् 1.15.26,29)

अत्रेदमवधेयं यत् यथा रावणेन मानुषेणैव वध्यत्वरूपो वरः प्राप्तः, तथैव दैवैः स्तुतस्य विष्णोः पक्षतः देवैः वरोऽयं प्राप्तो यद् भगवान् विष्णुः रावणवधम् उद्दिश्य मानुषं रूपमेव ग्रहीष्यतीति। एतेन वरान्तरेण वरविशेषस्य प्रतीकारोऽत्र परिलक्षितुं शक्यते।

श्रीमद्भागवते हिरण्यकशिपुः ऊर्ध्वबाहुः आकाशदृष्टिः पादाङ्गुष्ठेन स्थितः परमदारुणं तपस्तेपे–

**स तेपे मन्दरद्रोण्यां तपः परमदारुणम्।**
**ऊर्ध्वबाहुर्नभोदृष्टिः पादाङ्गुष्ठाश्रितावनिः॥**

(श्रीमद्भागवतम् 7.3.2)

तस्याप्रतिमं तपो दृष्ट्वा ब्रह्मा स्वयं विस्मितो भूत्वा तस्मै वरं प्राददात् किं च स्वाभीष्टं वरम् अभ्यर्थयितुमवदत्–

**विलक्ष्य विस्मितः प्राह प्रहसन् हंसवाहनः।**
**ब्रह्मोवाच– उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप।**
**वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः॥**

(श्रीमद्भागवतम् 7.3.17)

ब्रह्मण आगमनेन नितरां तुष्टः तस्य विशिष्टां स्तुतिं च कुर्वन् हिरण्यकशिपुः वररूपेणातीव दुर्लभं देवमानवादिभिः स्वस्यावध्यरूपं कमपि अतिविशिष्टं वरं सम्प्रार्थयत। तस्य तपसा नितरां सन्तुष्टेन ब्रह्मणा वरस्यास्य दुर्लभत्वं समवगच्छतापि तादृशो वरः प्रादायि–

**एवं वृतः शतधृतिर्हिरण्यकशिपोरथ।**
**प्रादात्तत्तपसा प्रीता वरांस्तस्य सुदुर्लभान्॥**



**ब्रह्मोवाच– तातेमे दुर्लभाः पुंसा यान् वृणीषे वरान् मम।**
**तथापि वितराम्यङ्ग वरान् यदपि दुर्लभान्॥**

(श्रीमद्भागवतम् 7.4.1-2)

तादृशस्य दुर्लभस्य वरस्य कारणेनैव भगवतो विष्णोः नरसिंहावतारः, किं च शस्त्रास्त्रैः अवध्यस्य तस्य हिरण्यकशिपोः नखविदारणेन हननमित्यादि प्रसङ्गो विदितचर एव। अत्रेदं संलक्षितुं शक्यते यत् तपसः गाम्भीर्यं तपोनिष्ठस्य बलवत्त्वं साधयति, तेन स तपोनिष्ठः असाध्यं दुर्लभं च स्वाभीष्टं प्राप्तुं देवानपि आत्मवशीकुर्वन्निव प्रभवतीति।

रघुवंशे राजा दिलीपः सुदक्षिणया सह मुनेः वसिष्ठस्याश्रमे कामधेनुवत्सायाः नन्दिन्याः गोः सेवारूपं व्रतं तप इव समाचरत्। पुत्रप्राप्तिः तस्य तपसः लक्ष्यमासीत्। एकविंशतिं दिनानि तप आचरतस्तस्य परीक्षां स्वसृष्टसिंहविशेषेण नन्दिनी आत्मनः आक्रान्तत्वं कल्पयन्ती अकरोत्, किं च तत्र राज्ञः आत्मतनुत्यागेनापि सेव्यमानायाः गोः रक्षणाय सन्नद्धतां समीक्ष्य तस्मै पुत्रप्राप्तिरूपं वरं प्रायच्छत्–

**इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः।**
**सदा व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य॥**

(रघुवंशम् 2/25)

कुमारसम्भवे पिनाकिनं पतिरूपेणावाप्तुकामा अतीव कोमलतनुः पार्वती तादृशं कठोरं तपः आचरत् येन कठिनैः तपःशरीरैः साधिता महातपस्विनां तपोवृत्तिरपि म्लानतामगच्छत्–

**तपः शरीरैः कठिनैरुपार्जितं**
**तपस्विनां दूरमधश्चकार सा॥**

(कुमारसम्भवम् 5/29)

पिनाकितुल्यः पतिः तत्प्रणयश्च केवलं तपोभिरवाप्तुं शक्य इति निरचिनोत् पार्वती–

**अवाप्यते वा कथमन्यथा द्वयं**
**तथाविधं प्रेम पतिश्च तादृशः॥** (कुमारसम्भवम् 5/2)

पार्वत्याः तपसा महायोगी महेश्वरः स्वस्थानं परित्यज्य जटिलस्य ब्रह्मचारिणः रूपेण पार्वत्याः तपःस्थलीं प्राविशत्, किं च पार्वत्याः महेश्वरं प्रति अनितरसाधारणं प्रणयं परीक्ष्य आत्मानं तस्याः पुरतः समार्पयत्–

**अद्यप्रभृत्यवनताङ्गि तवास्मि दासः**
**क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।** (कुमारसम्भवम् 5/86)

अत्र पार्वत्याः तपोभिः महेश्वरतुल्यो योगिराजः सुतरामाकृष्टोऽभवत्, किं च वरविशेषं स्वमुखतः अप्रार्थयमानायै अपि पार्वत्यै स्वस्य समर्पणमुखेन पार्वत्यभीष्टं वरं तस्यै अयच्छदिति विशेषो ध्यातव्यः।

उपर्युक्तेषु सर्वेषु उदाहरणेषु प्रासङ्गिकं तपो व्रतं वा सम्यक् परिलक्ष्यते एव। किं च तेन साध्या वरविशेषावाप्तिरपि दृश्यते। किन्तु तेषु तपसः व्रतस्य वा स्वरूपे सर्वत्र समानता नास्ति। नचिकेताः केवलं यमं प्रतीक्षमाणः अनासक्तं तप एव आचरन् आसीत्। पुत्रप्राप्तये दिलीपः पतिप्राप्तये पार्वती च यद्यपि विशिष्टं लक्ष्यमादाय तपः आचरतः स्म, तथापि तयोः तपः आन्तर्गतं शुद्धभावं द्योतयति। लक्ष्यपूर्तेः कालः कः, कुत्र च सा लक्ष्यपूर्तिरिति अनवगत्यापि निरन्तरं व्रतमाचरतोः तयोः पुरतः लक्ष्ये विद्यमानेऽपि तत्र तादृशे कर्मफले वा अनासक्तिः सुतरां द्योत्यते, अपरं च तयोः स्वस्वतपःकर्मणि एव सन्नद्धता सुतरां प्रतीयते। तत्रैव रावणस्य हिरण्यकशिपोः उग्रं तपः, किं च ब्रह्मणः पुरतः केवलं स्वस्य कथंचिद् अमरत्वम् अथवा अमरवत् स्थितिम् अवाप्तुं तादृशवरप्रार्थना इत्येतद्द्वयं तयोः द्वारा सत्यस्योल्लङ्घनवृत्तिः सुस्पष्टा भवति। 'जातस्य हि ध्रुवो मृत्युः' इति जानतोऽपि तयोः मृत्युराहित्यम् अवाप्तुं तपः किं च कठोरोपायेन प्राप्तव्यस्य मृत्योः प्रायशः असम्भाव्यत्वं पुरस्कृत्य तयोश्चिन्तनं प्रकृतिनियमस्य प्रातिकूल्यम् आचरति। अतः तयोः तादृशमुपायं परिकल्प्य भगवतोऽवतारोऽपि तत्तदवसरेषु सम्यग् विवृत एव।

एतेभ्यो विवरणेभ्यः एतत् स्पष्टं जायते यत् तपः तपसे, व्रतं व्रताय वा एव वरम्, न तु तपः वराय। किं च अभीष्टो वरः आध्यात्मिकतया दार्शनिकतया अथवा भौतिकतया सन्नद्धोऽपि सन् यदि प्राकृतिकनियममनुल्लङ्घ्य प्रवर्तते तर्हि तपःसिद्धः सः वरो ज्यायानेव। किन्तु मृत्योरप्राप्तिमिव अप्राकृतिकम् असम्भवं लक्ष्यमुद्दिश्य आचरितस्य तपसः परिणतिः तत्कालाभीष्टसिद्धिसाधकं सदपि अन्ततः दुःखाय कष्टाय वा भवतीति रावणस्य हिरण्यकशिपोश्च उदाहरणेन सुतरां विज्ञातुं शक्यते। अत एव छात्राणामध्ययनं तपः इत्यादिषु सुभाषितेषु यस्य तपसः उल्लेखः क्रियमाणोऽस्ति तत् मूलतः तपः तपसे इति उत्तमं तपः अभिलक्ष्यैव उद्दिष्टमस्ति। यदि तत्र भौतिकम् आध्यात्मिकं वा किंचिल्लक्ष्यमभीष्टं स्यात् तत्रापि प्रकृतिनियमस्य प्रातिकूल्यमनाचरतः तपसः एव परिणतिः सुखप्रदा भवितुमर्हति, अन्यथा नेति भावः अवश्यम् ऊह्यः।

'आरण्यकम्' इदं तादृशमुत्तमं तपश्चरतां कृते सम्यक् प्रेरणाप्रदं भूयादिति आस्माकीना अभ्यर्थना।

सितम्बर, 2013

विद्वद्वशंवदः

गोपबन्धु मिश्र

सम्पादकः, आरण्यकस्य



## सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. **रामचन्द्रसूरेः कौमुदीमित्रानन्दे जीवनमूल्यानि** | डॉ. श्यामानन्दमिश्रः<br>आसोसिएट प्रोफेसर<br>साहित्यविभागः<br>संस्कृतविद्याधर्मविज्ञानसङ्कायः,<br>काशीहिन्दूविश्वविद्यालयः,<br>वाराणसी | १ |
| २. **भर्तृहर्यनुमतं शब्दतत्त्वम्-एकमनुशीलनम्** | प्रो. बनमाली विश्वालः<br>गङ्गानाथ झा परिसरः<br>राष्ट्रियसंस्कृतसंस्थानम्<br>(मानितविश्वविद्यालयः)<br>चन्द्रशेखर आजाद पार्क,<br>इलाहाबाद | ७ |
| ३. **रावणार्जुनीयमहाकाव्ये कारकप्रयोगः-विश्लेषणात्मकं चिन्तनम्** | अरिजित् गुप्तः<br>शोधच्छात्रः<br>संस्कृतविभागः,<br>काशीहिन्दूविश्वविद्यालयः,<br>वाराणसी | २१ |
| ४. **स्वातन्त्र्योत्तरकालिकी पाणिनीयशास्त्रप्रवृत्तिः** | बबुआनारायणमिश्रः<br>शोधच्छात्रः<br>संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः,<br>वाराणसी | २९ |

| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| ५. वैदिकसमाजविधानं जीवनदर्शनं च | डॉ. विनोद चौधरी<br>अतिथिप्रवक्ता, संस्कृतविभागः<br>सुन्दरवती महिला महाविद्यालयः<br>भागलपुरम् (बिहारः) | ३७ |



# रामचन्द्रसूरेः कौमुदीमित्रानन्दे जीवनमूल्यानि

डा. श्यामानन्दमिश्रः

अस्मिन् युगे स्वार्थसाधनमात्रपरस्य किञ्च भौतिकसुखसामग्रीसंकलनरतस्य मनुष्यमात्रस्य दुष्प्रवृत्तेः धार्मिकसामाजिकराजनैतिकादिषु क्षेत्रेषु यथा जीवनमूल्यानि क्षरन्ति यथा च जना अविमृश्यकारिणः अतएव आपद्ग्रस्तास्ततोऽभिभूताश्च दृश्यन्ते, तत्सर्वमवलोक्य पुनः-पुनः आयान्ति स्मृतिपथे 'आ नो भद्राः क्रतवो यन्तु विश्वतः'[1], 'आकूतिः सत्या मनसो मे अस्तु'[2] प्रभृतिवेदवचनानि, प्रेरयन्ति च 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत'[3] इति।

वस्तुतः समस्येयं मूल्यक्षरणस्य नाद्यतनीया प्रत्युत प्राक्कालादेव रामायणमहाभारतादिषु रावणदुर्योधनादीनां प्रसङ्गे द्रष्टुं शक्यते। अतश्च आदिकालतः संस्कृतशास्त्राणां प्रवृत्तेः प्रयोजनेष्वन्यतमं लोकोपकारिजीवनमूल्यानां संरक्षणमप्यासीदित्यत्र न काचिद् विप्रतिपत्तिः। वेदपुराणेतिहासव्याकरणदर्शनादिषु शास्त्रेषु महामनीषिभिर्यद्यज्ज्ञानं लिपिबद्धमस्ति तेषां सर्वेषां प्रयोजनं मानवमात्रस्य व्यवहारज्ञानप्रदानपुरस्सरं पुरुषार्थसाधनद्वारा ऐहिकामुष्मिकफलप्राप्तिरेव। तथा च काव्यशास्त्रिभिर्भरतभामहमम्मटादिभिस्तन्मतानुसारिभिश्च कालिदासबाणभट्टादिभिरपि महाकविभिर्यथावसरं प्रदर्शितमेव व्यवहारज्ञानस्य मूल्यरक्षणस्य वा प्रत्यक्षं प्रकारान्तरेण वा काव्यप्रयोजनत्वमिति। पूर्वाचार्याणां सरणिमेवावलम्ब्य खैष्टद्वादशशताब्द्याः जैनमहाकविना रामचन्द्रसूरिणा स्वकीये कौमुदीमित्रानन्दाख्ये प्रकरणे लोकोपकाराय बोधितानां जीवनमूल्यानां चर्चात्र संक्षेपेण विधीयते–

संस्कृतमतावस्माकं लोककल्याणस्योदात्ततमा भावनात्यन्तमेव बलवती। तामेव

| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| ५. वैदिकसमाजविधानं जीवनदर्शनं च | डॉ. विनोद चौधरी<br>अतिथिप्रवक्ता, संस्कृतविभागः<br>सुन्दरवती महिला महाविद्यालयः<br>भागलपुरम् (बिहारः) | ३७ |




# रामचन्द्रसूरेः कौमुदीमित्रानन्दे जीवनमूल्यानि

डा. श्यामानन्दमिश्रः

अस्मिन् युगे स्वार्थसाधनमात्रपरस्य किञ्च भौतिकसुखसामग्रीसंकलनरतस्य मनुष्यमात्रस्य दुष्प्रवृत्तेः धार्मिकसामाजिकराजनैतिकादिषु क्षेत्रेषु यथा जीवनमूल्यानि क्षरन्ति यथा च जना अविमृश्यकारिणः अतएव आपद्ग्रस्तास्ततोऽभिभूताश्च दृश्यन्ते, तत्सर्वमवलोक्य पुनः-पुनः आयान्ति स्मृतिपथे 'आ नो भद्राः क्रतवो यन्तु विश्वतः'[1], 'आकूतिः सत्या मनसो मे अस्तु'[2] प्रभृतिवेदवचनानि, प्रेरयन्ति च 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत'[3] इति।

वस्तुतः समस्येयं मूल्यक्षरणस्य नाद्यतनीया प्रत्युत प्राक्कालादेव रामायणमहाभारतादिषु रावणदुर्योधनादीनां प्रसङ्गे द्रष्टुं शक्यते। अतश्च आदिकालतः संस्कृतशास्त्राणां प्रवृत्तेः प्रयोजनेष्वन्यतमं लोकोपकारिजीवनमूल्यानां संरक्षणमप्यासीदित्यत्र न काचिद् विप्रतिपत्तिः। वेदपुराणेतिहासव्याकरणदर्शनादिषु शास्त्रेषु महामनीषिभिर्यद्यज्ज्ञानं लिपिबद्धमस्ति तेषां सर्वेषां प्रयोजनं मानवमात्रस्य व्यवहारज्ञानप्रदानपुरस्सरं पुरुषार्थसाधनद्वारा ऐहिकामुष्मिकफलप्राप्तिरेव। तथा च काव्यशास्त्रिभिर्भरतभामहमम्मटादिभिस्तन्मतानुसारिभिश्च कालिदासबाणभट्टादिभिरपि महाकविभिर्यथावसरं प्रदर्शितमेव व्यवहारज्ञानस्य मूल्यरक्षणस्य वा प्रत्यक्षं प्रकारान्तरेण वा काव्यप्रयोजनत्वमिति। पूर्वाचार्याणां सरणिमेवावलम्ब्य खैष्टद्वादशशताब्द्याः जैनमहाकविना रामचन्द्रसूरिणा स्वकीये कौमुदीमित्रानन्दाख्ये प्रकरणे लोकोपकाराय बोधितानां जीवनमूल्यानां चर्चात्र संक्षेपेण विधीयते–

संस्कृतमतावस्माकं लोककल्याणस्योदात्ततमा भावनात्यन्तमेव बलवती। तामेव

पोषयति प्रेरयति च तदर्थमस्मान् प्रकरणकारस्येयमुक्तिः–

**चिन्तयन्त्युपकुर्वन्तः सस्तवं हृदि सस्पृहाः।**
**निस्पृहाणां च को नाम कामः संस्तवचिन्तने॥2.5**

अथ च

**निष्काङ्क्षमुपकारोऽपि विश्वोत्तीर्णा सतां क्रिया।**
**अप्रकाशस्तु यस्तस्य तत्र ब्रह्मापि मन्थरः॥6.7**

अत्र स्वार्थपराणामपेक्षया निष्कामभावनया लोकोपकारे प्रवृत्तानां प्रकर्षः प्रथमे पद्ये व्यतिरेकमुखेन द्वितीये चान्वयमुखेन प्रतिपादितः। अतश्चात्मनः कल्याणाकल्याणमविचार्यैव निःस्वार्थभावनया परोपकारकरणे प्रवर्तेत जनः। तत्र यद्यात्मनो लौकिकमकल्याणमपि कदाचिज्जायेत तदपि पारलौकिककल्याणस्यैव हेतुत्वं भजते, यतो हि परमार्थस्त्वयमेव यत् परोपकारो वस्तुत आत्मकल्याणायैव भवति। यदाह मित्रानन्दमुखेन ग्रन्थकृत्–

**परोपकारः क्रियते स्वस्य कल्याणहेतवे।**
**ततोऽपि यद्यकल्याणं कल्याणात्तत् पदं परम्॥ 2.13**

आनन्दमेव पारमार्थिकं सद् इति मत्वा तदर्थमेव प्रवर्त्तितव्यं जनैः। यतोहि, अपारे खलु संसारसागरे निमग्नानां कृते द्विचतुःक्षणं यावद् भवति न वा भवति अवकाश आनन्दाय, तत्रापि दुःखचिन्तनमेव यदि स्यात्तर्हि कुतोऽवसर आनन्दाय इत्येवोपदिशति नवमेऽङ्के मकरन्दस्येयमुक्तिः–

**आजन्म यानि जायन्ते व्यसनानि सहस्रशः।**
**स्मर्यन्ते तानि चेन्नित्यं कोऽवकाशस्तदा मुदे॥9.5**

परिवर्तिनि ह्यस्मिन् जगति न सुखं न वा दुःखमेव स्थास्नु भवति। यदुक्तम्–

**अस्तमयति पुनरुदयति पुनरस्तमुपैति पुनरुदेत्यर्कः।**
**विपदोऽपि सम्पदोऽपि च सततं न स्थास्नवः प्रायः॥1.8**

लोकयात्राप्रवर्तनक्रमे जीवस्य हि दशा चक्रारपङ्क्तिरिव कदाचिन्नीचैर्गच्छति कदाचिदुपरि च। अतः गहनेऽपि दुःखोपनिपाते विवेकिभिर्जनैर्धैर्यवद्भिर्भाव्यमित्युपदिशन्नाह प्रकरणकारः–

**सर्वथाऽप्यसारव्यसनकान्तारपतितेनापि प्रेक्षापपूर्वकारिणा प्राणिना**



**न विषादवैधुर्यमाधेयम्।** इति। 6.पृ.96

जीवने यद्यपि विधेरानुकूल्यमपि कार्यसिद्धौ अतिमहत्त्वपूर्णमस्तीति मनुते रामचन्द्रः। अनुकूले हि विधौ यदप्यसम्भवप्रायं तदपि सहसैव सिद्ध्यति। यदुक्तं ग्रन्थकृता–

**अभिमुखवर्तिनि वेधसि पुण्यगुणवर्जितानि सर्वाणि।**
**द्वीपान्तरस्थितान्यपि पुरः प्रधावन्ति वस्तूनि॥6.4**

दुःखाब्धौ निमग्नस्यापि विधातानुकूलोऽस्ति चेत् तरणोपायाः स्वत एव स्फुरन्ति। तस्य प्रातिकूल्ये तु पुनरुपाया अप्यपायत्वं यान्तीति प्रतिपादितमत्र–

**स्फुरन्त्युपायाः शान्त्यर्थमनुकूले विधातरि।**
**प्रतिकूले पुनर्यान्ति तेऽप्युपाया अपायताम्॥ 2.9**

तथापीदं विधेरानुकूल्यं प्रातिकूल्यं वा यद्वा भाग्यं तत्सर्वं वस्तुतः कर्माधीनमेव। अतो जना भाग्याश्रिता न, किन्तु कर्मपरायणा किं वा पुरुषार्थसम्पादनपरा भवेयुरित्यादिशति कौमुदीमित्रानन्दकृत्। भाग्याधीनं जगत्सर्वमिति मत्वा ये अकर्मण्या एव तिष्ठन्ति ते सर्वथा निन्दनीयाः। ये पुनः महात्मानस्ते तु 'दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्' इति मत्वा यथासामर्थ्यं पुरुषार्थसम्पादने प्रवृत्ताः भवन्ति–

**सम्पत् परस्य रोहन्ती भाग्यानां मुखमीक्षते।**
**स्वशक्तितोलनं नाम माहात्म्यं तु महात्मनाम्॥ 2.8**

सत्कर्मसम्पादनक्रमे अज्ञानोपहितचेतसां नीतिनिपुणम्मन्यमानानामाक्षेपः तस्य कर्मणो हेयत्वे प्रमाणत्वं न भजते। अतस्तेषां निन्दाभयेन कस्मिंश्चित् कर्मणि विवेकिनः पुरुषस्याप्रवृत्तिर्मा भूत् इति सन्दिशति सूत्रधारस्येयमुक्तिः–

**व्यामोहप्रतिरोहपीतमनसः प्रज्ञाप्रसादाञ्चिता**
**स्तस्माद्यद्यपजानते किमपि तैर्बाध्यामहे किं वयम्।**
**सूर्याचन्द्रमसावपि द्युतिमयौ निस्तेजसी लोचने**
**जानीतः स्फुरिताञ्जनैकवपुषौ तत् किं न तौ भास्वरौ॥1.2**

श्रेयांसि हि बहुविघ्नानि। श्रेयसे प्रवृत्तानां पथि पदे पदे दुर्जनाः विघ्नानि उपस्थापयन्ति। परमेतेन विघ्नजातेन सत्फलाभिलाषिणो विवेकिनो विचलिताः न

भवेयुः, किन्तु सधैर्यं विघ्नविघातपुरस्सरं श्रेयांसि सम्पादयेयुरिति निर्दिशन्नाह कौमुदीमित्रानन्दकृत्–

**दुर्जनोपनीतक्लेशकोटिकण्टकिला खल्वियं संसाराटवी। (अतः) गरीयसे च फलायोपनिबद्धकक्षेण प्रेक्षापूर्वकारिणा लोचने निमील्य सोढव्य एव प्रत्यूहव्युपनिपत्तयः।**1.पृ.2 इत्थं क्लेशकोटिकण्टकिलायामप्यस्यां संसाराटव्यां येऽविचलिताः दृढं तिष्ठन्ति त एव सिद्धिमाप्नुवन्ति, नान्ये। यतोहि–

**सन्ताप्य फलसमृद्धाः करोति धान्यौषधीस्तपनः।** 10.17

'अहिंसा परमो धर्मः' इति सिद्धान्तं द्रढयति कौमुदीमित्रानन्दकृत्। लोकेऽस्मिन् न केवलं त एव निन्दनीया ये हिसायां रताः, अपितु तेऽपि ये खलु हिंसार्थं प्रेरयन्तीति प्रतिपादयन्नाह प्रकरणकृत्–

**धिक् तानमुष्यसुहृदो नरकैकमार्गान् यैः शास्तृभिः पशुवधोऽयमिहोपदिष्टः।**
**तानप्यमन् मुनिमिषश्वपचान् विचारवन्ध्यान् धिगेव खलु यैरयमादृतश्च॥**1.17

वस्तुतः श्रेयःसिद्धिरक्रूरकर्मणैवेति स्थितेऽपि ये खलु क्रूरे कर्मणि व्यापृतास्ते तु भ्रमिता एव। यदुक्तम्–

**अक्रूरं श्रेयसे कर्म क्रूरमश्रेयसे पुनः।**
**इति सिद्धे पथि क्रूरं श्रेयसे स्पृशतां भ्रमः॥** 6.14

मातृदेवो भव इति यदुपदिष्टमुपनिषदि तदत्रापि समर्थितं कौमुदीमित्रानन्दे रामचन्द्रसूरिणा। अस्माकं जीवने मातुः किं महत्त्वं तदत्र द्रष्टव्यम्–

**निसर्गसौहृदाज्ञातकायवाङ्मनसः क्लमाः।**
**बालाः कथं नु जीवेयुर्न भवेज्जननी यदि॥** 7.5

अपत्यस्य प्राणरक्षार्थं या प्राणानपि त्यक्तुं तत्परा भवति तामपि मातरं ये अज्ञत्वात् त्यजन्ति ते तु क्रूराः सर्वथा निन्द्या एव–

**अपत्यस्य जीवितस्यार्थे प्राणानपि जहाति या।**
**त्यजन्ति तामपि क्रूरा मातरं दारहेतवे॥** 7.7

नास्ति खलु स उपायो येन वयं निःस्वार्थमेवास्मासु स्नेहवर्षणं कुर्वत्याः मातुः प्रत्युपकारमाधातुं समर्थाः भवेम। यदाह प्रकरणकृत्–



**अस्मिन् जगति महत्यपि न वेधसा किमपि तद् वस्तु घटितम्।**
**अनिमित्तमित्रवृत्तेर्भवति यतो मातुरुपकारः॥** 7.6

कस्मिंश्चिदपि राज्ये समाजे वा सुव्यवस्थासम्पादनाय न्यायव्यवस्थायाः न्यायाधिकारिणश्चापि महती भूमिका भवति। समाजे व्यवस्थाभञ्जकान् अपराधिनो दण्डयितुं राज्ञा नियोजितस्य न्यायाधिकारिण इदं सुमहद्दायित्वं यत् तथा निर्णयः करणीयो यथा वास्तविका एवापराधिनो दण्डिताः स्युर्न पुनः निरपराधाः। अत एव न्यायकर्मणि प्रवृत्तस्य राज्ञः न्यायाधीशस्य वा कृते इदमत्यावश्यकं यद् उचितानुचित-योर्निर्णये सः पक्षपातरहितः स्यात्। यतो हि–

**अपक्षपातेन यदर्थनिर्णयस्तदेव धर्मः किमपि क्षमाभुजाम्।** 9.6

किञ्च, उभयोरपि वादिप्रतिवादिनोः पक्षं श्रुत्वा तैः प्रस्तुतानाञ्च साक्ष्याणां सत्यत्वासत्यत्वं सम्यक् परीक्ष्यैव कस्मिंश्चित् पक्षे निर्णयः कर्त्तव्यो नान्यथा। यदुक्तम्–

**विना विशेषचिह्नेन युक्तो नैकत्र निर्णयः।** 9.7

अपि च,

**नैकस्य संलापश्रवणेन निर्णयः कर्तुं शक्यते।** 9 पृ.154

एतद्विपरीतमाचरन्तो राजानो न्यायाधिकारिणो वा अमर्षमात्सर्यविमोहादिदोषदूषिताः अनुचितं निर्णयं कुर्वन्तो न केवलं नयशालिनां प्राणानपहरन्ति, अपितु स्वयमपि गाढे नरके निपतन्ति–

**अमर्षमात्सर्यविमोहकैतवैरसून् हरन्तो नयशालिनामपि।**
**शुभेषु वृत्तिं दधतोऽपि केषुचित् पतन्त्यगाधे तमसि क्षितीश्वराः॥** 9.11

अत्र मृच्छकटिककृतोऽपि वचः प्रमाणत्वेनोपस्थापयितुं शक्यम्। उक्तं हि न्यायाधिकारिणि वाञ्छितान् गुणान्निर्दिशता तेन–

**शास्त्रज्ञः कपटानुसारकुशलो वक्ता न च क्रोधन-**
**स्तुल्यो मित्रपरस्वकेषु चरितं दृष्ट्वैव दत्तोत्तरः।**
**क्लीबान्पालयिता शठान्व्यथयिता धर्म्यो न लोभान्वितो**
**द्वाभ्यां वै परतत्त्वबद्धहृदयो राज्ञश्च कोपापहः॥** 9.5

एवमेवान्येऽपि बहवो मानवजीवनोपयोगिनः सिद्धान्ताः प्रकरणेऽस्मिन् कौमुदीमित्रानन्दयोः प्रणयवृत्तवर्णनव्याजेन तात्कालिकसामाजिकदशायाः प्रदर्शनक्रमे यथावसरमुपदिष्टा याननुसृत्य उन्नतिपथे प्रवृताः वयं स्वकीयं जीवनं सफलयितुं प्रभविष्णवो भवेम इति शिवम्।

❖

## सन्दर्भाः


1. ऋग्वेदः 1.98.1
2. अथर्ववेदः 5.3.4
3. कठोपनिषद् 1.3.14


❖



# भर्तृहर्यनुमतं शब्दतत्त्वम् - एकमनुशीलनम्

प्रो. बनमाली बिश्वालः

### भूमिका

शीर्षकाङ्कितं 'शब्दतत्त्वम्' इत्येकं समस्तं पदम्। 'शब्दस्य तत्त्वम् = शब्दतत्त्वम्' अथवा 'शब्द एव तत्त्वम् = शब्दतत्त्वम्' इत्युभयथा विग्रहं कृत्वा द्विविधः समासः विधीयते। व्याकरणशास्त्रे शब्दतत्त्वसिद्धान्तोऽयं कदा प्रारब्धः इत्यस्मिन् विषये विचारात् प्राक् प्रसङ्गवशादेतदपि विचाणीयमस्ति यत् कस्तावत् शब्दः, कश्च तस्य अर्थः, कश्च तयोः सम्बन्धः इति। ततः शब्दस्य किं स्वरूपम्, शब्दतत्त्वस्य च कथं विकासोऽभवदित्यादिविषयेऽपि विचारोऽपेक्ष्यते। शब्दतत्त्वस्य नैके पक्षाः सम्भवन्ति। तेषु तस्य व्यावहारिकपक्षः प्रमुखो वर्तते येन सामान्यो जनः साक्षात् सम्बद्धोऽस्ति।

अत्र एतत्कथनस्य आवश्यकतैव नास्ति यत् शब्दतत्त्वस्य व्यावहारिकपक्षः एव तस्य अन्येभ्यः सर्वेभ्यः पक्षेभ्यः प्रबलो भवतीति। यतो हि शब्दमयमिदं व्यवहारजगत्। शब्दं विना ह्येतस्य जगतः स्थितिरपि कल्पयितुं न शक्यते। संसारे यदि शब्दाख्यं ज्योतिर्नाभविष्यत् तर्हि भुवनत्रयं नूनं तमसावृतम् अभविष्यदिति दण्डिना काव्यादर्शे मुक्तकण्ठं प्रतिपादितम्–

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥**[1]

ज्ञानं नाम प्रकाशरूपम्, अज्ञानञ्च अन्धकाररूपम् इति सार्वजनीनं तथ्यम्। संसारे एवं न किञ्चिज्ज्ञानं वर्तते यत् शब्दं विना व्यक्तं भवितुमर्हतीति वाक्यपदीये भर्तृहरिणा प्रतिपादितम्–

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥[2]

वस्तुतः वाक्यपदीयस्य इयमेकैव कारिका शब्दतत्त्वस्य व्यावहारिकपक्षं सुष्ठु लक्षयितुमर्हति।

एतस्य शब्दस्य अनुशासनं व्याकरणमेव करोति। अर्थात् शब्दरूपेण व्याकरणं सर्वविधस्यापि प्रयोगस्य अनुशासनं करोति। अत एव शब्दानुशासनमिति व्याकरणस्य नामान्तरमप्यस्ति। 'व्याक्रियन्ते प्रकृतिप्रत्ययविभागपूर्वकं शब्दा अनेन' इति व्याकरणस्य व्युत्पत्तिरपि तथ्यमेतत् पोषयति। 'तदस्य तदस्मिन् स्यादि'ति पाणिनि-सूत्रस्य[3] व्याख्यान-प्रसङ्गे कैयटः प्रतिपादयति–"यत्रार्थे लोकाः शब्दान् प्रयुञ्जते तदर्थाभिधायिन एव शास्त्रेणानुविधीयन्ते प्रयोगमूलत्वाद् व्याकरणस्मृतेः।"[4] यतो हि साधुशब्दप्रयोगाय व्याकरणनियमानां ज्ञानमत्यावश्यकम्। लोके यादृशाः प्रयोगा भवन्ति वैयाकरणैः तादृशाः नियमाः विरच्यन्ते। वस्तुतः प्रयोगाणां साधुत्वायैव व्याकरणनियमाः प्रणीयन्ते। अत एव प्रयोगशरणं व्याकरणमिति काचिदुक्तिः प्रसिद्ध्यति। लोकप्रयोगमनादृत्य व्याकरणं पदमेकं न गच्छति। एवं शब्दव्याकरणयोः घनिष्ठः सम्बन्धः सर्वजनग्राह्यो वर्तते। "महान् हि शब्दस्य प्रयोगविषयः" इति महाभाष्ये[5] पतञ्जलिः अभिप्रैति। अनेन व्याकरणस्य व्यापकत्वमपि गतार्थं भवति।

शब्दप्रयोगविषये न केवलं प्रक्रियायाः महत्त्वम् किन्तु अर्थविचारोऽपि तथैव महत्त्वं भजते। यतो हि साधुशब्दो नाम केवलं सुन्दरं शरीरं वर्तते, तन्निष्ठोऽर्थश्च तस्य आत्मा। आत्मानुशीलनं दर्शनशास्त्रस्य विषयोऽस्ति। अत एव व्याकरणस्य दर्शनशास्त्रत्वमपि विद्वद्भिरङ्गीक्रियते। यथा दर्शनशास्त्रेषु आत्मनो ब्रह्मणो वा चर्चा प्राधान्येन विधीयते, तथैव व्याकरणे शब्दब्रह्मणो विचारोऽवश्यम्भावीत्यतः प्रायः व्याकरणग्रन्थेषु तद्विषये चर्चा समुपलभ्यते। वस्तुतः व्याकरणात्पदसिद्धिः भवति, पदसिद्धेश्च अर्थनिर्णयः, अर्थनिर्णयात् तत्त्वज्ञानं भवति, तत्त्वज्ञानाच्च परं श्रेयोऽर्थात् मोक्षावाप्तिर्भवतीति वक्तुं शक्यते।

शब्दतत्त्वं तत्स्वरूपञ्च–विभिन्नैः शास्त्रकारैः शब्दस्य लक्षणं भिन्नभिन्न-प्रकारेण कृतम्। न केवलं वैयाकरणाः किन्तु नैयायिकाः, मीमांसकाः तथा चान्ये दार्शनिकाः स्वस्वशास्त्रदृष्ट्या शब्दस्वरूपं विवेचितवन्तः। तेषां विचारेषु क्वचित्



साम्यं वर्तते क्वचिद् वैषम्यं च परिलक्ष्यते। अत्र यद्यपि मुख्यतया वैयाकरणाभिमतं शब्दतत्त्वं विशिष्य च वाक्यपदीयाभिमतं शब्दतत्त्वं पुरस्कृत्यैव विचाराः प्रस्तोतव्याः सन्ति तथापि प्रसङ्गतः नैयायिकमीमांसाकानामपि केचन विचाराः प्रस्तूयन्ते–

नैयायिकमीमांसकाभिमतं शब्दतत्त्वम्– श्रोत्रग्राह्योऽर्थः शब्दः, अथवा श्रोत्रग्राह्यगुणविभाजकधर्मवत्त्वं शब्दत्वमिति नैयायिकाभिमतं सामान्यं शब्दलक्षणम्। नैयायिकेषु अन्नम्भट्टेन "श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधः ध्वन्यात्मकः वर्णात्मकश्च। ध्वन्यात्मकः भेर्यादौ, वर्णात्मकः संस्कृतभाषादिरूपः"[6] इति तर्कसंग्रहे प्रतिपादितमस्ति। विश्वनाथपञ्चाननेन मुक्तावल्यां[7] तथा उदयनेन किरणावल्यां[8] च ध्वन्यात्मकः वर्णात्मकश्चेति द्विविधः शब्दः अङ्गीकृतः। द्विविधश्चासौ शब्दः कुत्रचिद् अवर्णलक्षण-वर्णलक्षणत्वेनापि प्रसिद्धः। तत्र ध्वन्यात्मकः अवर्णलक्षणः अकारादिरूपः वर्णात्मकश्च वर्णलक्षणः। ध्वन्यात्मकशब्दस्य परिभाषाप्रसङ्गे मुक्तावलीकारः वदति–तारतारतरत्वादिधर्मवानभिघातादिजन्योऽस्फुटः ध्वन्यात्मकः शब्दश्च प्रत्येकं त्रिधा विभज्यते। तस्य विचारोऽत्र विस्तारभयान्न क्रियते। शब्दोत्पत्तिः द्विधा भवति वीचितरङ्गवत्, कदम्बपुष्पमञ्जरीवच्चेति मुक्तावलीकारोऽभिप्रैति। मीमांसकानां मते कण्ठताल्वाद्यभिघातानां श्रवणेन्द्रियविषयाणां वर्णानामेव शब्दत्वं वाचकत्वं चास्ति। प्रकरणपञ्जिकायां कः शब्दः इति जिज्ञासायामुच्यतेवर्णा इति। तत्र च हेतुं दर्शयितुमुच्यते–"तेषामेव श्रोत्रग्राह्यत्वात्।"

वैयाकरणाभिमतं शब्दतत्त्वम् –वैयाकरणा अपि शब्दस्य द्वैविध्यमङ्गीकुर्वन्ति– स्फोटात्मकं ध्वन्यात्मकञ्च। स्फोटात्मकः शब्दो नित्यः। शब्दानुशासनं तु नादाभिव्यङ्ग्यस्य स्फोटरूपस्य शब्दस्य न सम्भवति। वस्तुतः ध्वनिरूपे शब्दे प्रक्रियादिकार्यं भवति। लोके ध्वनिमेवाभिलक्ष्य शब्दव्यवहाराद् ध्वनेः शब्दत्वमङ्गीकृतं वैयाकरणैः। परन्तु अनयोर्मध्ये स्फोटात्मकः शब्दो मुख्यः। 'शब्दब्रह्म'प्रसङ्गे वर्णात्मकः वर्णलक्षणात्मको वा शब्दः ग्राह्यः। यस्य लक्षणं शब्द्यते ज्ञाप्यते अभिधीयतेऽनेन अर्थः इति स्वीक्रियते। येनोच्चारितेनार्थः प्रतीयते स शब्दः इति शृङ्गारप्रकाशे वर्ण्यते। स च शब्दः स्फोटरूपोऽस्तीति 'स्फुटति अर्थः यस्मादि'ति स्फोटलक्षणाज्ज्ञायते। वर्णात्मकः शब्दः पुनः द्विविधः–सार्थकः निरर्थकश्च। सार्थकः प्रकृतिप्रत्ययनिपातरूपः, निरर्थकश्च कचटतपादिरूपः। सार्थकोऽपि शब्दः

पुनः द्विविधः–वैदिकः लौकिकश्च। लौकिकः विधिनिषेधार्थवादभेदेन त्रिविधः। यथा–पाकं कुर्यात् (विधिः), इदमनिष्टं न कुर्यात् (निषेधः), अयं ब्राह्मणः स्वमहिम्ना सर्वं जगत्पवित्रं करोति (अर्थवादः)। वैदिकोऽपि पुनः विधिः मन्त्रः नामधेयं निषेधः अर्थवादश्चेति पञ्चविधः। आप्तोक्तः एव लौकिकः शब्दः प्रमाणभूतः। वैदिकशब्दस्तु सर्वथा प्रमाणभूतः। शृङ्गारप्रकाशे शब्दस्य द्वादश उपभेदाः वर्णिताः सन्ति–प्रकृतिः, प्रत्ययः, उपस्कारः, उपपदम्, प्रातिपदिकम्, विभक्तिः, उपसर्जनम्, समासः, पदम्, वाक्यम्, प्रकरणम्, प्रबन्धश्चेति। अनेन वाक्यप्रकरणप्रबन्धादीनामपि शब्दत्वं ज्ञाप्यते।

उपर्युक्तविचारादनुमीयते यद् वैयाकरणेष्वपि शब्दस्वरूपविषये मतानैक्यं दृश्यते। वस्तुतः पाणिनेरारभ्य नागेशं यावद् वैयाकरणैः स्वस्वमतानुसारं शब्दो व्याख्यातः। पाणिनिः यद्यपि साक्षात् शब्दस्वरूपं न विवृणोति तथापि तस्य केभ्यश्चित् सूत्रेभ्योऽनुमीयते यत् तेन स्फोटात्मकः, ध्वन्यात्मकश्च उभयविधः शब्दः स्वीकृतः। "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[९] इति सूत्रे तेन स्फोटात्मकः शब्दः स्वीकृतः। यतो हि तत्सूत्रानुरोधेन अर्थविषयकबोधजनकशब्दमुद्दिश्यैव प्रातिपदिकसंज्ञा विधीयते। स्फोटात्मकं शब्दं विना शब्दे अर्थविषयकबोधजनकत्वशक्तिर्नोत्पद्यते। "इको यणचि" इति सूत्रे च तेन ध्वन्यात्मकः शब्दोऽभिप्रेतः। यतो हि केवलं स्फोटात्मकशब्दस्वीकारे इकः स्थाने यणादेशः न स्यात्। अमरकोशेऽपि व्याकरण-शास्त्रदिशा द्विविधः शब्दः स्वीकृतः। व्याकरणशास्त्रे यो वाचकः साधुः स शब्दः स्फोटात्मकः अपरस्तु ध्वन्यात्मकः इति तत्र विवरणमुपलभ्यते।

सिद्धे शब्दार्थसम्बन्धे[10] इति वार्तिकच्छलेन कात्यायनेनापि स्फोटात्मा शब्दः स्वीकृतः। वार्तिकप्रयुक्तः शब्दः स्फोटरूपमर्थं व्यनक्ति। अन्यथा शब्दस्य नित्यरूपं नैव सिद्ध्येत्। भाष्यकृता पतञ्जलिना शब्दस्वरूपविचारप्रसङ्गे स्फोटात्मकः ध्वन्यात्मकश्च शब्दः सङ्केतितः। 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः'[11] इति वदता तेन स्फोटात्मकस्य शब्दस्य लक्षणं प्रतिपादितम्। 'प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते'[12] इति च वदता तेन ध्वन्यात्मकस्य शब्दस्य लक्षणं विहितम्। तपरस्तत्कालस्येति सूत्रे अपि भाष्ये[13] स्फोटः शब्दः ध्वनिः शब्दगुणः इति प्रतिपादितं वर्तते। तत्र निम्नलिखिता



कारिकापि उद्धृता वर्तते–

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**
**अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः॥**[14]

**वाक्यपदीयाभिमतं शब्दतत्त्वं तत्स्वरूपञ्च**

वाक्यपदीयकारेण भर्तृहरिणा उपादानानुपादानत्वेनापि द्विविधः शब्दः स्वीकृतः। नदीनिर्झरमणिनूपुरवीणामृदङ्गादीनां शब्दाः ये व्याकरणप्रक्रियायां नोपादीयन्ते ते अनुपादानाः। तद्भिन्नानां व्याकरणप्रक्रियायाम् उपादीयमानानाञ्चोपादानत्वम्। प्रकारान्तरेणापि शब्दो वाग्रूपावाग्रूपत्वेन च द्विधा प्रोक्तः। वाग्रूपोऽपि मनुष्यवाक् मनुष्येतरवाक्त्वेन च द्विविधा विभक्तः। मनुष्यवाचः साध्वसाधुत्वेन भेदद्वयं स्वीकृतम्। अनयोः मनुष्यवाग्रूपः शब्द एव उपादानम्। एवं भर्तृहरिणापि ध्वन्यात्मकः स्फोटात्मक इति द्विविधः शब्दः स्वीकृतः। ध्वनिस्तु द्विविधः–प्राकृतः, वैकृतश्च। प्राकृतः स्वाभाविकः यः स्फोटरूपस्य शब्दस्योपलब्धौ हेतुः भवति। येन ध्वनिना प्राथम्येन स्फोटोपलब्धिर्भवति सः प्राकृतध्वनिः। येन चोपलब्धोऽपि सः प्रचिरतरकालं यावदुपलभ्यते सः वैकृतो ध्वनिः। भर्तृहरेर्मतानुसारं ध्वनेः स्फोटात् पृथक् प्रतीतिर्न भवति। स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते।[15] कैयटमतेऽपि शब्दो व्यङ्ग्यव्यञ्जकत्वेन द्विविधः। ध्वनिः व्यञ्जकः स्फोटः व्यङ्ग्य इति तपरस्तत्कालस्येति सूत्रे[16] प्रदीपः प्रतिपादयति। स्फोटो नादाभिव्यङ्ग्यो वाचक इति शब्दस्वरूपव्याख्यानप्रसङ्गे नागेशोऽपि स्फोटात्मकं ध्वन्यात्मकमिति द्विविधं शब्दस्वरूपमङ्गीकरोति। लोके व्यवहृतेषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद् वर्णरूपः ध्वनिसमूहः शब्दः। ध्वनिपदेनात्र वैखर्याः ग्रहणं स्फोटपदेनाभिव्यञ्जकत्वादिको मध्यमावस्थ आन्तरशब्द उच्यते यथा जपाकुसुमलौहित्या-विभागेन स्फटिकादीनां ग्रहणं भवति।

वागपि शब्दरूपा भवति। सा च अनेकत्र ब्रह्मरूपेण वर्णिताऽस्ति। तद्यथा 'वाग् वै ब्रह्म' इति वचनम् ऐतरेयब्राह्मणे,[17] शतपथब्राह्मणे,[18] बृहदारण्यकोपनिषदि[19] चोपलभ्यते। 'वाग्ब्रह्म'[20] इति गोपथब्राह्मणे 'वाग्घि ब्रह्म'[21] इति ऐतरेयब्राह्मणे 'वागिति तद् ब्रह्म'[22] इति जैमिनीयोपनिषदि च यानि वचनान्तराण्युपलभ्यन्ते तान्यपि वाचः ब्रह्मत्वं प्रतिपादयन्ति। 'ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते' इति छान्दोग्योपनिषद्वचन-मपि[23] वाचः ब्रह्मणा सादृश्यं साधयति। एवं वाचः ब्रह्मत्वे शब्दस्यापि ब्रह्मत्वमुपपन्नम्।

शब्दचर्चाप्रसङ्गे वाचः प्रसिद्धाश्चतस्रोऽवस्थाः परा-पश्यन्ती-मध्यमा-वैखरी-रूपाः विवेचनीयाः सन्ति। परा वाक् शब्दब्रह्मरूपा मूलाधारे अर्थात् कुण्डलिन्यां वर्तते, पश्यन्ती च नाभिप्रदेशे संस्थिता शोभते। मध्यमा हृदि तिष्ठति एवं च वैखरी कण्ठदेशे वर्तते इति परमलघुमञ्जूषायां स्फोटनिरूपणप्रसङ्गे नागेशः प्रतिपादयति। प्रसङ्गेऽस्मिन् सः अधोलिखितां कारिकामुद्धरति–"परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता। हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।" आसु चतसृषु वाक्षु वैखरी व्यवहारयोग्या भवतीति ज्ञापयितुं सः वदति–"वैखर्या हि कृतो नादः परश्रवणगोचरः। मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।" अर्थात् यद्यपि मध्यमावैखरीभ्यामुभाभ्यां नादः क्रियते तत्र फले भेदः दृश्यते। अनयोर्मध्यमानादः स्फोटरूपशब्दस्य व्यञ्जकः, वैखरीनादश्च सर्वेषां श्रावणप्रत्यक्ष-विषयो भवति। वस्तुतः परा, पश्यन्ती, मध्यमेति त्रय्यः वाचः सूक्ष्मरूपाः भवन्ति याः गुहायां निहिताः नेङ्गयन्ति, न चेष्टन्ते न वा निमिषन्ति। अतः वैखरीवाचमेव मनुष्या वदन्ति। एतत्प्रसङ्गे ऋग्वेदस्यासौ मन्त्रः महाभाष्यस्य पस्पशाह्निकेऽपि उद्धृतोऽस्ति–

**चत्वारि वाक् परिमिता पदानि तानि विदुर्मनीषिणः।**

**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥[24]**

परा वाक् वर्णादिविशेषरहिता चेतनमिश्रा सृष्ट्युपयोगिनी जगदुपादानभूता कुण्डलिनीरूपेण प्रणिनां मूलाधारे वर्तते। सा च, कुण्डलिन्याः प्राणवायुसंयोगे व्यज्यते। वाक्षु केवलमियमेव निःष्पन्दा वर्तते। अन्याः पश्यन्त्यादयश्च सस्पन्दाः सन्ति, याः एतस्याः विवर्तरूपाः सन्ति। इयमेव परा वाक् 'सूक्ष्मस्फोट' इत्युच्यते। अत एव भर्तृहरिणा व्याकरणस्य त्रिविधवाग्विषयत्वं प्रतिपादितम्–

**वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।**

**अनेकतीर्थभेदस्य त्रय्यो वाचः परं विदुः॥[25]**

वस्तुतः एतासां चतसृणां वाचां क्वचिद् व्याकृताव्याकृतेति भेदद्वयेन वर्गीकरणं दृश्यते। व्याकृतेति शब्देन पश्यन्त्यादित्रय्याः, अव्याकृतेति शब्देन च शक्ति-शक्तिमदादिभेदशून्यायाः परावाचः व्यवहारः। एवमेव महाभारतेऽपि वाक्पूर्विकायाः सृष्टेः विषये चर्चा समुपलभ्यते–



**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**

**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥[26]**

उपर्युक्तायां कारिकायां वाक्पदेन पश्यन्ती एव ग्राह्या। वस्तुतः तस्या एव ओंकारः, वेदः, शब्दब्रह्मेत्यादीनि नामान्तराणि प्रसिद्ध्यन्ति।

**वाक्यपदीयाभिमतः शब्दार्थसम्बन्धः**

शब्दतत्त्वस्य परिधौ शब्दार्थः तथा च शब्दार्थयोः सम्बन्धः अपि आयाति। पाणिनिकात्यायनपतञ्जलिभिः शब्दार्थसम्बन्धस्य नित्यत्वमङ्गीकृतमिति भर्तृहरिः वाक्यपदीये प्रतिपादयति–

**नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।**

**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः॥[27]**

भर्तृहरेः मतानुसारम् उच्चरितः शब्दः तत्त्वत्रयम् अभिव्यनक्ति–शब्दः, वक्तुः इच्छा तथा तत्पदार्थश्च–

**ज्ञानं प्रयोक्तुर्बाह्योऽर्थः स्वरूपं च प्रतीयते।**

**शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः॥[28]**

तन्मतानुसारेण शब्दे अर्थः स्वभावतः एव निरूढो वर्तते न तु केनचिदारोपितः। अतः शब्दो नित्यः, तस्य अर्थो नित्यः तथा तयोः सम्बन्धः अपि नित्यः। उक्तं च भर्तृहरिणा वाक्यपदीये–

**स्वभावत एव निरूढो न तु पुरुषेण निवेशित इत्यर्थः।[29]**

इन्द्रियविषययोः यः सम्बन्धः स एव सम्बन्धः शब्दार्थयोः। भर्तृहरिः वाक्यपदीये तादृशमभिमतमुपस्थापयितुं वदति–

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**

**अनादिरर्थैः शब्दानां योग्यता तथा॥[30]**

भर्तृहरिः शब्दार्थयोः सम्बन्धं नित्यं मनुते। शब्दार्थयोः मध्ये अभिव्यङ्ग्या-भिव्यञ्जकभावः संम्बन्धः वर्तते। तत्र शब्दः अर्थस्य कारणरूपोऽस्ति। अतः तयोः मध्ये कार्यकारणसम्बन्धः अपि वर्तते इति भर्तृहरिः वाक्यपदीये प्रतिपादयति–

**शब्दः कारणमर्थस्य स हि तेनोपजन्यते।**

**तथा च बुद्धिविषयाद्यर्थाच्छब्दः प्रतीयते॥**[31]

**शब्दतत्त्वस्य ब्रह्मत्वम्**

वस्तुतः शब्दब्रह्म नाम शब्दतत्त्वस्य नामान्तरमस्ति। शब्दस्य ब्रह्मत्वं तु शास्त्रेषु बहुत्र प्रतिपादितम्। यतो हि तस्मिन् ब्रह्मणः लक्षणानि प्रायः घटितानि भवन्ति। शब्दः सद्रूपः नित्यत्वात्। शब्दस्य नित्यत्वपक्षः महता समारम्भेण पतञ्जलिना महाभाष्ये विमृष्टः- अयं नित्यः शब्दः अस्त्येव कूटस्थेष्वविचालिषु भावेषु वर्तते।[32] महाभाष्यदीपिकायामपि 'एतच्चार्थस्वरूपं स्फोटः, अयमेव शब्दात्मा नित्यः' इति उक्तं भर्तृहरिणा।[33] वाक्यपदीयेऽपि भर्तृहरिः वदति-

**सत्यं वस्तु तदाकारैरसत्यैरवधार्यते।**

**असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते॥**[34]

वस्तुतः शब्दः चिद्रूपः वर्णितः ज्ञानमयत्वात्। वाक्यपदीयेऽपि भर्तृहरिः शब्दस्य ज्ञानमयत्वं प्रतिपादयतीति पूर्वमालेखस्यारम्भे सङ्केतितमस्माभिः। वस्तुतः ज्ञानस्य शब्दरूपेण परिणामः भवति। शब्दश्च आनन्दरूपः स्वीकृतः आत्यन्तिकसुखदत्वात् स्वर्गफलदत्वाच्च। तथा चोक्तं पतञ्जलिना महाभाष्ये-एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति इति।[35] "यः शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते, अथवा पुनरस्तु ज्ञाने एव धर्म"[36] इत्यादि महाभाष्यवचनान्यपि शब्दस्य ब्रह्मत्वपक्षं समर्थयन्ति। अस्मत्परम्परायां शब्दस्य जगत्कर्तृत्वं प्रसिद्धम्। 'वागेव विश्वा भुवनानि जज्ञे', 'वाग्घि प्रजापतिः'[37] 'वाग्वै प्रजापतिः'[38], 'प्रजापतिर्वै वाक्पतिः'[39] इति शतपथब्राह्मणस्य वाक्यानि तत्र प्रमाणभूतानि सन्ति। अपरं च प्रजापतिर्हि वाक् इति तैत्तिरीयब्राह्मणस्य[40] वचनमपि तथ्यमेतत् समर्थयति। भर्तृहरिरपि वाक्यपदीये वदति यत् शब्दब्रह्म एव जगद्रूपेण विवर्तते-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**[41]

अतात्त्विकोऽन्यथाभावः विवर्तः, सतात्त्विकोऽन्यथाभावः परिणामश्चेति यद्यपि



विवर्तपरिणामयोर्भेदो वरीवर्ति तथापि जगदेतत् शब्दब्रह्मणः विवर्तरूपं, परिणामरूपमिति चोभयथा भर्तृहरिणा प्रतिपादितमिति वक्तुं शक्यते। यतो हि 'शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः'[42] (वा.प.1.120) इति वदता तेन समस्तमपि जगत् शब्दस्यैव परिणामभूतमित्यपि उद्घोषितम्। अयं च शब्दः नित्यः बोधस्वभावश्च शब्दार्थमयः आन्तरः स्फोटः। आन्तरस्फोटरूपस्य शब्दब्रह्मापरपर्यायस्य शब्दतत्त्वस्य संविज्ञाने न मोक्षप्राप्तिः सम्भवति। एषोऽपि शब्दः वैदिकवाङ्मये वृषभ-महोदेवादिसंज्ञया वर्णितः-

**चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य।**

**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥**[43]

ऋषभेण महता देवेन सायुज्यम् अर्थात् शब्दब्रह्माभेदेनात्मज्ञानं मुमुक्षुभिः अभिप्रेतम्। तथा चोक्तं वाक्यपदीये-

**अपि प्रयोक्तुरमात्मानं शब्दमन्तरवस्थितम्।**

**प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यते॥** (वा.प.1.130)

उपर्युक्तमन्त्रस्य 'द्वे शीर्षे' इति मन्त्रांशं व्याख्यात्रा पतञ्जलिना उक्तम्- 'द्वौ शब्दात्मानौ, नित्यः कार्यश्च।'[44] अयञ्च विचारः भगवद्गीतायामपि वर्णितोऽस्ति-

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**

**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥**

**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।**

**यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः॥**[45]

व्याकरणाध्ययनप्रयोजनवर्णनप्रसङ्गे महाभाष्ये सः वदति यत् "महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्।"[46] अक्षरसमाम्नायप्रसङ्गेऽपि महाभाष्ये पतञ्जलिः वदति-'सोऽयम् अक्षरसमाम्नायः वाक्समाम्नायः, पुष्पितः फलितश्चन्द्रतारकावत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति मातापितरौ चास्य स्वर्गे लोके महीयेते।"[47] शतपथब्राह्मणेऽपि[48] 'आम्नाये संहृतभोग्यभोक्तृशक्तेः वागात्मनो बहुधा करणत्वम् आम्नातम्' इति वचनमुपलभ्यते यत्र 'वागात्मन्' इति पदेन शब्दब्रह्म वर्णितं वर्तते। 'ओमित्येकाक्षरं ब्रह्म' इत्यत्र

प्रणवः शब्दब्रह्मस्वरूपो वर्तते। सूतसंहितायां प्रणवः परापरभेदेन द्विविधः कल्पितः वर्तते-परः ब्रह्मात्मकः, अपरश्च शब्दात्मकः–

**परं परतरं ब्रह्म ज्ञानानन्दादिलक्षणम्।**
**प्रकर्षेण नवं यस्मात् परं ब्रह्म स्वभावतः॥**
**अपरः प्रणवः साक्षात् शब्दरूपः सुनिश्चितः।**
**प्रकर्षेण नवत्वस्य हेतुत्वात् प्रणवः स्मृतः॥**

इयं सृष्टिः शब्दब्रह्मपूर्विका वर्तते इति मनुसंहितायां प्रमाणमुपलभ्यते। वेदशब्देभ्यः जगतः सृष्टत्वात् शब्दस्य ब्रह्मत्वमिति तत्र प्रतिपादितमस्ति- "वेदशब्देभ्यः एवादौ पृथक् संस्थाश्च निर्ममे। ... एकाक्षरं परं ब्रह्म प्राणायामः परं तपः, अक्षरं त्वक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः।[49] इत्यत्र अक्षरशब्देन ओंकारः गृह्यते। एषोऽक्षरशब्दः शब्दतत्त्वेन स्फोटात्मना स्फोटनाम्ना वा व्याकरणशास्त्रे सिद्धिपथमागतः। भर्तृहरिमते परा वागेव ब्रह्मपदवाच्या भवति। एकमपि तत् शक्तिव्यपाश्रयात् भिन्नं भिन्नं भवति इति वाक्यपदीये प्रमाणमुपलभ्यते–'एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्' इति। एवमेव तथेदममृतं ब्रह्म निर्विकारमविद्यया। कलुषत्वमिवापन्नं भेदरूपं विवर्तते।।[50] इत्यपि अपरत्रोच्यते।

**शब्दतत्त्वस्य ब्रह्मत्वाङ्गीकारे प्रयोजनम्**

सर्वेषां शास्त्राणां लक्ष्यं भवति पुरुषार्थचतुष्टयसम्प्राप्तिः। धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु मोक्षस्य प्राधान्यं सर्वत्र विशिष्य भारतीयदर्शनेषु स्वीकृतम्। षट्सु वेदाङ्गेषु प्रधानं व्याकरणमित्यतस्तस्य मोक्षसाधकत्वमपि सप्रमाणं प्रतिपादितं बहुत्र। वाक्यपदीये "इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः"[51] इति वदता भर्तृहरिणा मोक्षप्राप्तिप्रसङ्गे व्याकरणस्य भूमिका रेखाङ्किता। एवं शास्त्रेषु यद्यपि जन्माभावरूपं, आत्यन्तिकसुखसाधकम् इत्येतादृशं मोक्षस्य बहुविधं लक्षणम् उपलभ्यते तथापि परब्रह्मणि परमात्मनि विलयमेव मोक्षस्वरूपमिति निर्विवादतया स्वीक्रियते। शब्दस्य ब्रह्मत्वस्वीकारे एतदेव मुख्यं प्रयोजनम्। शब्दब्रह्मणि निष्णातः परब्रह्माधिगमात् मोक्षाय अधिकारी भवति इति वचनमुपलभ्यते–

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥[52]**



**शब्दतत्त्वसिद्धान्तस्योत्पत्तिः क्रमविकासश्च**

शब्दतत्त्वसिद्धान्तः कियान् प्राचीनः इति विचारे सति सः सिद्धान्तः वैदिककालाद् उद्भूतः इति ज्ञायते। यतो हि वैदिकसाहित्ये अनेकत्र तस्य सूक्ष्मसङ्केतः प्राप्यते। वस्तुतः ऋक्संहितायाम् "चत्वारि शृङ्गा"[53] इत्यादिमन्त्रमाध्यमेन तस्य बीजवपनं जातम्। यजुर्वेदेऽपि 'इदं शब्दब्रह्म उत्तमं ज्योतिः' इति वचनमुपलभ्यते। एतदेव मतमपरत्र पल्लवितं दृश्यते। तद्यथा–'उत्तरो देवो नादः दिशः सूर्यः रविः रवो वा। शब्दब्रह्मैव उत्तमं ज्योतिरित्ययं वैदिकक्रमः।[54]

स्मृतिकारेषु मनुस्मृतिकारः मनुः शब्दब्रह्मणः पोषको दृश्यते। पुराणकाले महाभारते,[55] भागवते,[56] भगवद्गीतायां,[57] बृहन्नारदपुराणे[58] च सृष्टौ शब्दब्रह्मणः भूमिका सङ्केतितास्ति। अक्षररूपस्य शब्दरूपस्य वा वेदस्य ब्रह्मत्वस्वीकारे नारायणत्वाङ्गीकारे च प्रकारान्तरेण शब्दब्रह्मणः समर्थनं जायते। यतो हि 'सर्वा वाचो वेदमनुप्रविष्टाः नावेदविन्मनुते ब्रह्म किञ्चित्' इत्याद्युक्तिभिः प्रमाणितं भवति यत् यः वेदं न जानाति सः ब्रह्म ज्ञातुं न प्रभवति। शब्दब्रह्मणोऽवगमनं न तथा सुकरं वर्तते इत्यतः तत् समुद्रवत् अनन्तपारं, गम्भीरं, दुर्विग्राह्यं च वर्णितं वर्तते–

**वेदा ब्रह्मात्मविषयास्त्रिकाण्डविषया इमे।**
**परोक्षवादा ऋषयः परोक्षं मम च प्रियम्॥**
**शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयम्।**
**अनन्तपारं गम्भीरं दुर्विग्राह्यं समुद्रवत्॥[59]**

बृहन्नारदपुराणे, श्रीमद्भागवते च वेदः साक्षात् नारायणः इति प्रतिपादितो वर्तते। तत्र च क्रमशः 'वेदो नारायणः साक्षात्,[60] वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुमः"[61] इति वचने प्रसिद्ध्यतः। श्रीमद्भगवद्गीतायामपि तादृगेव मतं कयाचिद् भिन्नया शैल्या प्रतिपादितमस्ति। कर्मण उत्पत्तिः ब्रह्मणो भवति ब्रह्म च अक्षरसमुद्भूतं वर्तते। वेदस्य च अक्षररूपत्वं प्रसिद्ध्यति। अनेनापि वेदस्य नारायणसम्बद्धत्वं सूच्यते। तथा चोक्तम्–"कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्"[62] इति।

वैयाकरणेषु पतञ्जलिः शब्दब्रह्मविषये स्पष्टमुल्लिखति। सोऽपि प्रसङ्गेऽस्मिन्

साङ्केतिकं वैदिकमभिमतं पल्लवयति। ऋग्वेदादुद्धृतस्य 'चत्वारि शृङ्गा' इत्यादि-मन्त्रस्य व्याख्यावसरे महाभाष्यस्य टीकाकारैः उक्तम्– महान् = परब्रह्मस्वरूपः, देवोऽन्तर्यामिरूपः, साम्यं सायुज्यमिति। अनन्तरं भर्तृहरिः एतदेवाभिमतं विस्तारितवान्। वाक्यपदीयस्य प्रथमकारिकायां सः शब्दब्रह्मणः अर्थरूपेण विवर्तनं दर्शयति। तस्य मतानुसारम् अनादिनिधनं सर्वग्राह्यग्राहकाकारवर्जितं तत् शब्दब्रह्म मायासहितं सत् नामरूपात्मकमिदमखिलं जगत् बुद्धौ आकलय्य स्वकालाख्यया शक्त्या तन्मात्रपदवाच्यानि आकाशादीनि उत्पादयति। वाक्यपदीये नैकेषु प्रसङ्गेषु शब्दब्रह्मविषये उल्लेखः प्राप्यते–

**तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।**<br>
**तस्य प्रवृत्तिस्तत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते॥**[63]

**ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।**<br>
**विवृत्तं शब्दमात्राभ्यः तास्वेव प्रविलीयते॥**[64]

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**<br>
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥**[65]

अनन्तरं नागेशादिभिः लघुमञ्जूषादिग्रन्थेषु शब्दब्रह्मणः महत्त्वादिविषये चर्चां कृतवन्तः। मञ्जूषायां नागेशः शक्त्याश्रयप्रकरणे शब्दब्रह्मणः स्वरूपं विवृणोति। प्रलयकाले माया परमात्मनि लीयते। परन्तु तस्याः आत्यन्तिको नाशो न भवति। तस्यामवस्थायां सर्वं सुप्तवत् तिष्ठति। ततः यथाकालं मायापुरुषयोः उत्पत्त्यनन्तरं बिन्दुरूपमव्यक्तं त्रिगुणं शक्तिमत्त्वं च जायते अस्य अचिदंशः बीजम्, चिदचिन्मिश्रोंऽशः नादः, चिदंशश्च बिन्दुरस्ति। तस्माद् बिन्दोः अव्यक्तात्मा वर्णादिविशेषरहितः नादमात्रं रवः समुत्पन्नः यः रवः शब्दब्रह्मेति संज्ञया निगद्यते। एतादृशं मतं प्रपञ्चसारतन्त्रे[66] तथा शारदातिलके[67] चोपलभ्यते। लघुमञ्जूषायां ''क्रियाशक्तिसाधनायाः शब्दशब्दार्थकारणम्। प्रकृतेर्बिन्दुरूपिण्याः शब्दब्रह्माभवत् परा।'' इति वदता नागेशेनापि मतमेतत् समर्थितम्।

**उपसंहारः**

उपर्युक्तविचाराधारेण एतदुपसंहर्तुं शक्यते यत् शब्दतत्त्वविचारप्रसङ्गे पाणिनि-



प्रभृतयः प्राचीनवैयारकणा तथा जागरूकाः न दृश्यन्ते यथा तत्परवर्तिनः आचार्याः पतञ्जलिप्रभृतयः। वस्तुतः महर्षिपतञ्जलेः महाभाष्यादारभ्य एतद्विषयकं विशद-चिन्तनं समुपलभ्यते। ततः भर्तृहरि-नागेशादिभिश्च तच्चिन्तनमग्रेसारितम्। शब्दतत्त्वादि-विषये तु पतञ्जलिरपि तथा मुखरो न दृश्यते यथा भर्तृहरिः। एतद्विषये भर्तृहरि-नागेशयोर्मध्ये कश्चन मतभेदोऽस्ति। भर्तृहरिमतानुसारं नित्यं शब्दब्रह्म शब्दभावेन विवृतं सदर्थभावेन विवर्तते। सः शब्दब्रह्मणः सर्वजगदुपादानत्वं कूटस्थत्वं नित्यत्वं च अङ्गीकरोति। किन्तु नागेशः शब्दब्रह्मणः नित्यत्वं यावत्सृष्टिस्थित्या व्यवहारनित्यतया च स्वीकरोति। सम्पूर्णे व्याकरणशास्त्रे 'शब्द' इति शब्दः प्रायेण वर्ण-प्रकृति-प्रत्यय-धातु-पद-वाक्य-महावाक्य-परा-पश्यन्ती-मध्यमा-वैखरी-ध्वनि-शब्दप्रमाणादिष्वर्थेषु प्रयुक्तो वर्तते। 'शब्दब्रह्म' इत्यस्य कृते नादब्रह्म-स्फोट-शब्दतत्त्व-उत्तमज्योतिरादिशब्दानां प्रयोगः द्रष्टुं शक्यते। नादः इति यद्यपि शब्दस्य नामान्तरं वर्तते तथापि तेन ध्वन्यात्मकशब्दस्य बोधः सम्भवति। वस्तुतः वैयाकरणानां मते लौकिकपारमार्थिकभेदेन शब्दस्य द्वैविध्यमित्यपि वक्तुं शक्यते। तत्र ध्वन्यात्मकशब्दस्य लौकिकत्वम्, स्फोटात्मकशब्दस्य च पारमार्थिकत्वमभिप्रेतम्। वैयाकरणाः शब्दस्य कार्यत्वं नित्यत्वञ्च अङ्गीकुर्वन्ति। तैः ध्वन्यात्मकशब्दस्य कार्यत्वम्, स्फोटात्मकशब्दस्य च नित्यत्वमङ्गीकृतम्। नैयायिकास्तु ध्वन्यात्मकमेव शब्दमङ्गीकुर्वन्ति। अतस्ते शब्दस्य नित्यत्वं नाङ्गीकुर्वन्ति। वृत्तिमेव मुख्यं ज्ञानं मन्वानास्ते शब्दस्य न स्वप्रकाशकत्वं न वा नित्यत्वं मन्वते। पक्षान्तरे मीमांसकास्तु वैयाकरणानां मार्गमनुसरन्तः शब्दस्य नित्यत्वं स्वीकुर्वन्ति।

❖

## सन्दर्भाः


1. काव्यादर्शः 1.4
2. वाक्यपदीयम् 1.123
3. पा.सू. 5.1.16
4. प्रदीपः (पा.सू. 5.1.16)
5. महाभाष्ये पस्पशाह्निकम्
6. तर्कसंग्रहः (दीपिकासहितः) श्रीरामकृष्णमठ, मिलापोर, चेन्नइ,1994, पृ.67
7. न्यायसिद्धान्तमुक्तावली, कारिका 164-68

8. किरणावली,मुक्तावली,164-168
9. पा.सू. 1.2.45
10. सिद्धे शब्दार्थसम्बन्धे (वार्तिकम्) महाभाष्यम् 1.1.1 (पस्पशाह्निकम्)
11. तत्रैव
12. तत्रैव
13. तत्रैव, पा.1.1.70
14. तत्रैव
15. वाक्यपदीयम् 1.81
16. प्रदीपः, पा.सू. 1.1.70
17. ऐतरेयब्राह्मणः 6.3
18.शतपथब्राह्मणे2.1.4.10,14.4.1.23, 14.6.10.5
19. बृहदारण्यकोपनिषद् 1.3.21,4.1.2
20. गोपथब्राह्मणः (पूर्वभागः) 2.10
21. ऐतरेयब्राह्मणः 2.15.4.21
22. जैमिनीयोपनिषद् 2.9.6
23. छान्दोग्योनिषद् 6.3.2
24. ऋग्वेदः-1.164.45
25. वाक्यपदीयम् 1.144
26. महाभारतटीका, शान्तिपर्व 232.24
27. वाक्यपदीयम् 1.23
28. वाक्यपदीयम् 3.3.1
29. वाक्यपदीयटीका 3.3.1
30. वाक्यपदीयम् 3.3.29
31. वाक्यपदीयम् 3.3.32
32. महाभाष्यम् पा. 8.1.4
33. महाभाष्यदीपिका 3.4
34. वाक्यपदीयम् 3.2.2
35. महाभाष्यम्, पा.6.1.84
36. तत्रैव, 1.1.1 (पस्पशाह्निकम्)
37. शतपथब्राह्मणः 1.3.6.27
38. तत्रैव 5.1.5.6,13.4.1.15
39. तत्रैव 3.1.3.22
40. तैत्तिरीयब्राह्मणः 1.3.4.5
41. वाक्यपदीयम् 1.1
42. तत्रैव 1.120
43. ऋक्संहिता 4.58.3
44. महाभाष्यम् 1.1.1
45. श्रीमद्भगवद्गीता 15.16-17
46. महाभाष्यम् 1.1.1
47. तत्रैव 1.1.2
48. शतपथब्राह्मणः 6.5.3-4
49. मनु. 2.83-84
50. वाक्यपदीयम् 14-12
51. तत्रैव 1.16
52. मैत्रेयोपनिषद् 6.22
53. ऋक्संहिता 4.58.3
54. यजुर्वेदः 20.21
55. महाभारतम्, शान्तिपर्व 232.30
56. श्रीमद्भागवतम् 12.9.36
57. भगवद्गीता 6.44
58. बृहन्नारदपुराणम् 4.17
59. श्रीमद्भागवतम् 11.21.35-36
60. बृहन्नारदपुराणम् 4.17
61. श्रीमद्भागवतम् 6.1.40
62. श्रीमद्भगवद्गीता 3.15
63. वाक्यपदीयम् 1.132
64. तत्रैव 14.3-4
65. तत्रैव 1.11
66. प्रपञ्चसारतन्त्रे 1.41
67. शारदातिलकम् 1.11-12 चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतम्। तत्रैव 1.2


❖



# रावणार्जुनीयमहाकाव्ये कारकप्रयोगः-विश्लेषणात्मकं चिन्तनम्

**अरिजित् गुप्तः**

व्याकरणादिशास्त्राणां पदप्रयोगादीनां तथा गम्भीरतत्त्वमण्डितविषयाणां काव्यमार्गेण याथातथ्येन व्याख्यानाय निर्मितं काव्यरूपं शास्त्रकाव्यमित्याख्यां लभते। शास्त्रकाव्यतया भट्टिकविना प्राथम्येन विरचितं द्वाविंशतिसर्गात्मकं रावणवधाख्यं महाकाव्यम्। भट्टिकवेः कल्पनासाफल्यं शास्त्रकाव्यस्य रोचकत्वं च दर्शं दर्शमनुवर्तिनः कवयोऽनुप्रेरणां लभमानाः समप्रकारके काव्यनिर्माणे प्रयत्नशीला बभूवुः। एतेषु कश्मीरनिवासकर्ता भट्टभीमो भौमको वा विशेषस्थानभाग्भवति, तस्य रावणार्जुनीयाख्यस्य शास्त्रकाव्यस्य रचयितृत्वात्।

रावणार्जुनीयस्य कर्ता भट्टभीमो भट्टभौमको वा कस्मिन् काले कस्मिन्देशे कस्मिन्भूमण्डले जनिमलभत तन्निश्चयेन वक्तुमसाम्प्रतम्। सुवृत्ततिलके क्षेमेन्द्रः शास्त्रकाव्यकर्तृतया भट्टिकविना सह भट्टभीममपि उल्लिलेख-

**शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत्।**
**भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते॥** सुवृत्ततिलकम् 3/4

महाकाव्यमिदं कार्तवीर्यार्जुनरावणयोः सङ्गरवर्णनव्याजेन वैदिकसूत्राण्यपास्य अष्टाध्यायीस्थानाम् अखिलानां सूत्राणाम् अष्टाध्यायीक्रमेणैव प्रयोगान् प्रदर्शयति। महाकाव्यस्य सप्तविंशतौ सर्गेषु अष्टाध्यायीपादविभागविधिना संरचनं साधितम्।

सामूहिकतया, सप्तविंशतिसर्गात्मके रावणार्जुनीये महाकाव्ये राज्ञः कृतवीर्यसूनोः अर्जुनस्य चरित्रवर्णनं तथा च रावणेन सह तस्य युद्धवर्णनं च निबध्यते।

तृतीयसर्गारम्भे कार्तवीर्यार्जुनस्य मृगयायात्राया वर्णनव्याजेन नदी-घि-पदसंज्ञादिविषयिणां कारकनिपातादिविधायकानां च पाणिनिसूत्राणाम् उदाहरणानि सम्प्रदत्तानि। एतस्मिन् प्रस्तूयमाने शोधपत्रे कारकविधायिसूत्रोदाहरणैः महाकाव्यकथाकथानकं केन प्रकारेण विसज्जीकृतं तदेवान्वेष्टुम् उद्दिश्यते।

तृतीयसर्गसूचनायां विषयनिर्देशनार्थं नृपतेरर्जुनस्य ससैन्ययात्रां निर्दिदेश महाकविर्भट्टभीमः–

**ततः पुरीतः पुरुहुतविक्रमः क्रमेण राजा कृतसर्वकौतुकाम्।**
**मदान्धमातङ्गविलासगामिनीं वधूमिवादाय चमूं विनिर्ययौ॥** रा.3/1

सर्गस्यास्य वर्ण्याः मुख्यविषयाः कार्तवीर्यार्जुनस्य ससैन्यस्य राजनगरीतः बहिर्गमनम्, अरण्यप्रवेशः इत्यादयः। आनुषङ्गिकत्वेन गजतुरगादयः सादिगजारोहिणः, अश्वसमूहवेगाद् व्याप्तदिग्रेणूच्चयः, तेन विविधक्षेत्रेषु विविधाः प्रतिक्रियाः अरण्ये नरपतेः स्वभावकार्यादिविषयाश्चालोचिताः। परिवेशस्य एतादृक्षु वर्णनेषु अष्टाध्याय्याः कारकाधिकारादारभ्य कर्तृसंज्ञाविधायीनि सूत्राणि अपादानादिक्रमेण उदाहृतानि। अष्टाध्याय्याः अपादानादिक्रमेणैवात्र घटनापरम्परा विन्यस्ता। अत्र अपादानादिकारक-सूत्राणां काव्यिकप्रयोगाः यथाशक्ति दर्शयितुं प्रयत्यते।

## अपादानकारकसूत्रप्रयोगः

ससैन्ययात्राभिमुखिनः नरपतेः सैन्यसमूहस्थतुरगवेगाद् धूलिप्रकोपः सञ्जातः। नान्तिके न दवीयसि किमपि दृग्गोचरीभवदासीत्। अत्र धूलिप्रलिप्तपरिवेशवर्णने तत्रतिक्रियाकथने च अपादानसूत्राणि प्रयुक्तानि दृश्यन्ते।

**भूम्या दिवं रेणुचयः प्रयातस्ततो भयेनाविचलास्त सेना।** रा. 3/11

तुरगजवात् भूमिपृष्ठात् आकाशपथे रजः प्रादुर्भवति। अत्र भूमिः ध्रुवा, भूम्याः रजसः अपायः ऊर्ध्वगमनम्, अतः भूमेरपादानत्वम्, ''ध्रुवमपायेऽपादानम्'' (1/4/24) इति सूत्रात्।

रजःप्रकोपात् सर्वा दिशः व्याप्ताः, ततः मेघच्छलेन सैन्याः वर्षणाशङ्कया सन्त्रस्ता जाताः। अत्र रेणुचयः भयहेतुः, अत एवास्य अपादानत्वम्, सूत्रम्- 'भीत्रार्थाना. भयहेतुः' (1/4/25)



अश्वखुराग्रोत्थितस्य रजसः प्रकोपात् सर्वा दिशः परिव्याप्ताः। सर्वोऽपि जनस्तत्र रजःप्रभावं सोढुम् अशक्तो जातः।

**रेणूच्चयात्पथि पराजयते स्म कश्चित् ...** रा. 3/12

अत्र असोढः (असह्यः विषयः) रेणूच्चयः, पराजितः कर्ता- कश्चिज्जनः। रजःप्रकोपात्तस्य सोद्वेगासहनीयत्वात् रेणूच्चयस्य अपादानत्वम्। सूत्रम्- 'पराजेरसोढः' (1/4/26)

तुरगवेगोच्चयात् दिशः रेणुतीर्णतया अदर्शनार्हा जाताः। कश्चिदश्वारोही गजराजतः स्वात्मानं गोपायितुमवाञ्छत्, दिग्दर्शनाशक्यतया गजराजपादाघातेन अश्वारोहिणः पिष्टनसम्भावनात्।

**अन्तर्दधे करीवरादपरोऽश्वसादी।** रा. 3/12

प्रसङ्गश्चात्र करीवरात् सादिनोऽन्तर्धिः। अदर्शनं काङ्क्षमाणः कर्ता-अश्वारोही, स करीवरात् आत्मनो रक्षणाय अन्तर्धानमिच्छति। अतः अदर्शनाधारस्य करीवरस्य अपादानत्वम्, सूत्रम् – 'अन्तर्धौ येनादर्शनमिच्छति' (1/4/27)

गजवरश्चात्र मदमत्त आसीत्। गण्डदेशात्तस्य मदजलं प्रवहदभूत्।

**जातं कपोलफलकान्मदवारि...** रा. 3/12

अत्र, जनिकर्ता जायमानो पदार्थो वा गजमदवारि। जायमानस्य मदवारिणः प्रकृतिः उद्भवो वात्र गजराजस्य गण्डप्रदेशम्। अतः गजगण्डदेशस्य अपादानत्वम्। ''जनिकर्तुः प्रकृतिः'' (1/4/30) इति सूत्रात्।

करीवरस्य गण्डदेशस्थं मदजलं भ्रमरकुलमुपवसदासीत्। करीवरोऽपि स्वीयाभ्यां चलत्कर्णाभ्यां मदजललोलुपान् भ्रमरान् निवारयति स्म।

**तस्माद्भृङ्गान्यवारयदिभश्चलकर्णतालः।** रा. 3/12

अत्र, वारणकर्ता करीवरः, वारणविषयः भृङ्गाः, वारणविषये ईप्सितञ्च गजकपोलस्थं मदवारि। अतः भ्रमराणां वारणे ईप्सितत्वादपादानत्वम्, ''वारणार्थानामीप्सितः'' (1/4/27) इत्यस्मात्।

## सम्प्रदानकारकसूत्रप्रयोगः

तुरगखुरोत्थितरजःविस्तारात् सर्वस्यां दिशि व्याप्तायां, हस्तिनां गण्डप्रदेशात्

निर्गतेन मदवारिणा भूम्या रजस्तप्तता शान्तीकृता।

**घनैरिवाम्भो मदवारि दन्तिभिर्ददद्भिरुर्व्यै शमितं शनैः रजः।** रा.3/14

अत्र, कर्म मदवारि, दानकर्ता-हस्तिनः, याम् अभिप्रैन्ति सा उर्वी (भूमिः)। दानक्रियायां मदवारिरूपकर्मणा हस्तिनः उर्वीं प्रति आभिमुख्येन यन्ति। अतः 'उर्व्याः' सम्प्रदानत्वम्। सूत्रम्-'कर्मणा यमभिप्रैति स सम्प्रदानम्' (1/4/32)

पुनः, तुरगमुखेभ्यः निर्गतैः फेनराशिभिश्च रजःप्रशान्तिरवाप्ता। तुरगसङ्घाः राज्ञः प्रतापशालित्वं द्योतयन्तः अतिद्रुतगत्या धावन्ति स्म। अतः तेषां मुखेभ्यः फेनधारा पतन्त्यासीत्। फेनबिन्दूनभिदृश्य राजा प्रीतिमन्वभवद् इति प्रतिभाति स्म।

**तथाश्ववक्त्रच्युतफेनबिन्दुभी रुचिं नृपायेव तदानुवर्तिभिः।** रा.3/14

अत्र नृपः प्रीयमाणः, अतः रुच्यर्थधातुप्रयोगेन तस्य सम्प्रदानत्वम्, 'रुच्यर्थानां प्रीयमाणः' (1/4/33)।

राज्ञा अर्जुनेन यदा मृगयार्थं प्रयतितं तदा तद्गौरवद्योतनाय कुञ्जाभ्यन्तरात् पटहः शब्दायते, पटहशब्दात् अन्तिकस्थपर्वतोऽपि प्रतिध्वनित्वेन राजगौरवमुद्भावयतीति प्रत्यभात्। यथा वर्णितं राजगार्जुनीये–

**ध्वनितं पटहेन यन्नृपस्य प्रतिशब्देन तदाशु कुञ्जभाजा।**

**पटहाय गिरिः समीपवर्ती सपदि प्रत्यगृणादिवाब्धिधीरम्॥** रा.3/22

अत्र, पूर्वव्यापारः - पटहेन शब्दनिनादः, पूर्वव्यापारस्य कर्ता- पटहः उत्तरव्यापारः (प्रोत्साहनमित्यर्थः)-गिरिणा कृतो प्रतिध्वनिः।

'प्रत्यगृणात्' इति प्रतिपूर्वक-गृ धातोः प्रयोगः। पूर्वस्याः निनादक्रियायाः कर्ता पटहः। अत एव पटहस्य सम्प्रदानत्वम्। पाणिनिसूत्रम्–'अनुप्रतिगृणश्च'(1/4/41)।

## करणकारकसूत्रप्रयोगः

ससैन्यः राजधानीतो निर्गमनानन्तरम् मध्येवनं राजा अर्जुनः अश्वपृष्ठमारुह्य सेनानीमध्यात् न्यूनसैन्यसनाथेन बहिरगमत्।

**निर्जगाम तुरगेण सैन्यतः स्वल्पसैनिकपरिच्छदो नृपः।** रा. 3/23

अत्र, क्रिया- निर्जगाम, राज्ञः वनमध्यगमनम्। क्रियायाः साधकतमम्-



तुरगः। राज्ञः स्वल्पसैन्यसमभिव्याहारेण गहनारण्यप्रवेशे तुरगः प्रकृष्टं साधनम्, अतस्तस्य करणत्वम्, 'साधकतमं करणम्' (1/4/42) इति पाणिनिसूत्रात्।

द्वितीयतया, अटव्यां पशुसमाजे सङ्गोपने अटितुकामः स नृपः प्रतिपक्षाः केचिन्नृपाः सशरचापा वर्तन्त उत नेति लक्षितुं कृतप्रयत्नश्चासीत्–

**देवितुं मृगकुले शनैः शरान्दीव्यतश्च नृपतीन्निरीक्षितुम्॥** रा. 3/23

अत्र क्रिया-देवितुम् (क्रीडितुम्), दीव्यतः (चालयतः); क्रियायाः प्रकृष्टसाधनम्-शराः। दिवधातोः प्रयोगेण शराणां मृगकुले राज्ञः खेलनक्रियायां, अपरनृपतीनां च खेलनक्रियायां च साधकतमत्वात् करणत्वम्, सूत्रम्-'दिवः कर्म च' (1/4/43)

मध्येवनं गमनार्थं कश्चन पादाङ्कशतमूल्येन घोटकमेकं परिक्रीय तमारोहत्। समानतया घोटकोऽपि तुल्यमूल्यविनिमयात् तन्मूल्यतोऽपि अधिकमूल्यवन्तं परिक्रीतं वाहं प्राप्नोत्।

**एकेन पादाङ्कशतेन कश्चिदश्वं परिक्रीतमुपारुरोह।**

**अश्वोऽपि पादाङ्कशताय तस्माद्वरं परिक्रीतमवाप वाहम्॥** रा.3/24

पादाङ्कशतमूल्यप्रदानेन अश्वः परिक्रीतः, वाहञ्च परिक्रीतम् इत्यत्र परिक्रयणे साधकतमं करणम्- 'पादाङ्कशत' इति मूल्यम्। अतोऽस्य विकल्पेन सम्प्रदानत्वम्, सूत्रम्-'परिक्रयणे सम्प्रदानमन्यतरस्याम्' (1/4/44)।

## अधिकरणकारकसूत्रप्रयोगः

तुरगं परिक्रीय तस्मिन्नातिष्ठति स्म राजा। तस्य तूणीरे ऊर्ध्वपूरिता बाणाः आसन्। ऊर्ध्वमुखिभिः तच्छरैः अश्वस्य उभयपार्श्वे अपूर्वा शोभा रचिता इति कविना कल्पितम्।

**आस्थितस्य तुरगे महीपतेरूर्ध्वपूरमभिपूरितौ शरैः।**

**आहितावुभयतस्तुरङ्गमं मानवीं रुचिमवापतुः पराम्॥** रा. 3/25

अत्र राजा आधेयः, तुरगः आधारः। अतस्तुरगस्य अधिकरणत्वम्, 'आधारोऽधिकरणम्' (1/4/45) इत्यस्मात्सूत्रात्।

## आधारस्य कर्मत्वविधायकसूत्रप्रयोगः

आधारस्य कर्मसंज्ञाप्राप्तेः सूत्राणामपि उदाहरणार्थं श्लोकाः संरच्यन्तेऽत्र।

यस्मिन् वनप्रदेशे पशुवर्गः निर्भयं निवसति, राजा स्वयमेव यत्र अटन्नस्ति, अत्र अन्यः कश्चिदपि राज्ञः प्रतीक्षार्थं नाविद्यत। यथा वर्णितमत्र महाकाव्येऽस्मिन्-

**यमधिशिश्ये मृगकुलं विभयमध्यास्त यं भूपतिः स्वयम्।**

**नाध्यतिष्ठत्तं वनोद्देशमन्यो नृपाप्रतीक्षया॥** रा.3/26

'अधिशिश्ये' इत्यत्र कर्ता मृगकुलम्, तस्य आधारश्च वनोद्देशः, अधिपूर्वकात् शीङ्-धातोः प्रयोगेण क्रियायाः आधारस्य वनोद्देशस्य कर्मत्वम्। सूत्रम्-'अधिशीङ्स्थासां कर्म।' (1/4/43)।

तदनुरूपम्, 'अध्यास्त' इत्यत्र कर्ता भूपतिः, तस्य आधारः वनोद्देशः, अधिपूर्वकात् आस् धातोः प्रयोगात् क्रियाधारस्य वनोद्देशस्य कर्मत्वम्।

किञ्च, 'अध्यतिष्ठत्' इत्यत्र अधिपूर्वक-स्थाधातोः प्रयोगे कर्ता 'अन्यः' (कश्चन), आधारः वनोद्देशः, तस्य कर्मत्वप्राप्तिः।

## कर्मकारकविधायकसूत्रप्रयोगः

स्वराजधान्यां लोकप्रियस्य कार्तवीर्यार्जुनस्य अरण्यीयकार्यकारित्वं वर्णयति श्रीभट्टभीमः, एतदवसरे कर्मकारकसूत्राणि उदाह्रियन्ते। तद्यथा-

**ररक्ष सत्त्वानि ममर्द कण्टकान्तथैव राजा नगरे नरप्रियः।**

**उद्वेजयञ्छात्रवलोकमोजसा वनेऽपि तद्वनजायतेक्षणः॥** रा.3/29

अत्र, कर्ता नरप्रियः राजा, अतः, कर्तुः उद्वेजनक्रियया ईप्सिततमः विषयः 'शात्रवलोकम्' (शत्रुकुलम्)। अतः, कर्तुः क्रियया आप्तुमिष्टतमकारकत्वात् 'शात्रवलोक'-स्य कर्मत्वम्। सूत्रम्- 'कर्तुरीप्सिततमं कर्म' (1/4/50)। तथा च, कर्तुः नृपस्य अनीप्सितः विषयः' सत्त्वम्' 'कण्टकान्' च। परन्तु शत्रुकुलविनाशक्रियया सार्धं सत्त्वरक्षणरूपायाः कण्टकमर्दनरूपायाश्च क्रियायाः संयोगोऽस्ति, अतः 'सत्त्व' इत्यस्य 'कण्टक' इत्यस्य च कर्मत्वप्राप्तिः। 'तथायुक्तं चानीप्सितम्' (1/4/50) इति सूत्रात्।

## मूल्यायनम्

कविवरो भट्टभीमः स्वीये रावणार्जुनीये महाकाव्ये अष्टाध्यायीस्थानां सूत्राणां यथाक्रममुदाहरणानि काव्यवर्मणा उपास्थापयत्। एतस्मात्तस्य प्रयोगधर्मिता विज्ञायते।



सूत्राणां प्रचलितोदाहरणानि यानि काशिकाकौमुद्यादौ दरीदृश्यन्ते, तान्यतिरिच्य काव्यकथानकानुसारं नवीनान् प्रयोगान् सम्प्रदर्श्य अभिनवां शैलीमरचयत्। महाकाव्यस्य कथानकस्य पुष्ट्यर्थं ये ये विषयाः, यानि यानि पात्राणि आगच्छन्ति, तान्यधिकृत्यैव कारकसूत्राणां प्रयोगाः दर्शिताः। किञ्च, विषयाणाम् अवयवविशेषोऽपि क्वचित् अपादानादिकोटौ प्रतिष्ठाप्यते। यथा तृतीयसर्गे नृपतेः मृगयायात्राप्रसङ्गे राजतुरगाः, गजवराः, तुरगखुरोत्थितः रेणूच्चयः, रजःप्रकोपात् तुरगारोहिणः आत्मगोपनेच्छा, गजमदवारिणा भूमेः रजःशान्ति, तुरगमुखनिःसृतफेनैः राजतृप्तिः, पटहेन शब्दनिनादः, गिरिप्रतिध्वनिः, तुरगमधिरुह्य राज्ञः मध्येवनप्रवेशः, नृपतिना शत्रुकुलक्षयः, तत्सहकृतं सत्त्वरक्षणं कण्टकमर्दनं चेति। अत्र एषु एव विषयेषु तदवयवविशेषेषु च भिन्नभिन्नाधारेण अपादानादिकारकत्वं प्रयुक्तम्। इयमेव कवेः कल्पनशक्तिः वर्णनविदग्धता च।

लक्ष्यन्तामत्र पूर्वालोचिताः दृष्टान्ताः। तद्यथा, तुरगखुरवेगात् भूमितलात् ऊर्ध्वमार्गे रेणूच्चये भूमेः अपादानत्वं कल्पितम्। अत्र अपादानत्वे हेतुः भूमेः ध्रुवत्वम्। एकस्मिन्नेव गजराजविषये तस्य अवयवादिकं लक्षीकृत्य विविधमपादानत्वं प्रयुक्तम्। गजस्य कपोलफलकात् मदवारिणो निःसरणे कपोलफलकस्य जनिकर्तृप्रकृतित्वेन अपादानत्वम्, पुनश्च चलत्कर्णाभ्यां मदवारितः भृङ्गवारणे मदवारिण ईप्सितत्वेन अपादानत्वम्। रजःप्रादुर्भवात् करीवरात् सादिनः अन्तर्धानप्रयत्ने करीवरस्य अपादानत्वम्, अदर्शनविषयत्वात्। एकस्मिन्नेव प्रसङ्गे परस्परसम्बद्धान् विषयांशान् अवलम्ब्य तत्र कारकत्वं प्रयुक्तम्।

अपरस्मिन् कारकस्थलेऽपि तुल्या स्थितिर्दृश्यते। हस्तिभिः भूमिं प्रति मदवारिदाने भूमेः अभिप्रेतत्वेन सम्प्रदानत्वम्। राजाऽपि सम्प्रदानत्वमाप्नोति, अश्वफेनबिन्दुभी राज्ञः प्रीयमाणत्वात्। तुरगः क्वचित् अधिकरणं क्वचिच्च करणं भवति। तुरगमधिरुह्य नृपस्य बहिर्गमने प्रकृष्टसाधनतया तुरगस्य करणत्वम्, पुनः, आधेयस्य नृपस्य आधारतया तुरगमधिकरणं भवति।

राजवीर्येण शत्रुकुलविनाशे, शत्रुकुलस्य ईप्सिततमतया कर्मत्वम्, पुनः राज्ञा सत्त्वस्य रक्षणं कण्टकस्य मर्दनं चापि कर्मत्वेन प्रयुज्यते, विनाशक्रियया सह अनीप्सिततया युक्तत्वात्।

इत्यमवलोकितम्, महाकाव्यस्य कथानकानुसारं वस्तुपात्रविषयचरित्रादीनामेव भिन्नभिन्नसन्दर्भेषु भिन्नभिन्नाधारेषु भिन्नभिन्नकारकत्वमुदाहृतम्। काशिकादिशास्त्रेषु यानि प्रचलितोदाहरणानि लभ्यन्ते, ततो पूर्णतया भिद्यन्त एतादृशाः प्रयोगाः। एतादृशं नवीनं चिन्तनं भट्टभीमस्य रचनाया वैशिष्ट्यम्। अतः शास्त्रकाव्यस्यास्य राजयात्रादिकथानकवर्णनात्मकत्वेन काव्यत्वम्, क्रमेण सूत्रोदाहरणात्मकतया च शास्त्रत्वमपि सिद्धमिति शम्।

❖



# स्वातन्त्र्योत्तरकालिकी पाणिनीयशास्त्रप्रवृत्तिः

बबुआनारायणमिश्रः

नाविदितं विदुषां पाणिनीयव्याकरणस्य वैशिष्ट्यम्। पाणिनीयव्याकरणमेव त्रिमुनिव्याकरणत्वेनाप्यभिधीयते। तन्त्रेऽस्मिन् महर्षिपाणिनिः सूत्रकृत् कात्यायनो वार्त्तिककृत् पतञ्जलिश्च भाष्यकृद् वर्तते। वैयाकरणनये एतेषां त्रयाणामेव मुनीनां प्रामाण्यमङ्गीक्रियते, तेषामेव निखिलशब्दधर्मिकसाधुत्वप्रकारकप्रमात्मकज्ञानवत्त्वात्। व्याकरणमिदं यथाकालं यथामति प्राज्ञैः समीक्षितं समीक्ष्यते च। वैयाकरणसिद्धान्तकौमुद्या रचनानन्तरं व्याकरणस्यास्याध्ययनाध्यापनशैली परिवर्तिता। वैयाकरणसिद्धान्तकौमुद्या रचनायाः प्राक् प्रक्रियाशैलीमादाय ये ग्रन्था रचिताः, तत्राष्टाध्याय्याः सकलसूत्राभावात् ते न लोकप्रियतां गताः। वैयाकरणसिद्धान्तकौमुदी प्रक्रियाशैलीमादाय रचिता प्रथमा रचना विद्यते यत्र समेषां सूत्राणां प्रक्रियावार्त्तिकानाञ्च सोदाहरणं समीक्षणमुपलभ्यते। अत एव वैयाकरणसिद्धान्तकौमुदी विद्वत्सु प्रथिता। इत्थं प्रक्रियाक्रमशैल्या सूत्रक्रमशैल्यभिभूता। अत्र भट्टोजिदीक्षितस्य समीक्षणमेव कारणम्।

स्वातन्त्र्योत्तरकाले काचिद् विलक्षणा प्रवृत्तिः परिलक्ष्यते व्याकरणस्यास्य। अत्रापि केचन समीक्षकाः टीकाकारा दार्शनिकाश्च कारणम्। पाणिनीयशास्त्रस्याध्ययना-ध्यापनस्य त्रिधा प्रवृत्तिर्दृश्यते–

(क) प्रक्रियाश्रिता (ख) सूत्रक्रमाश्रिता

(ग) दर्शनाश्रिता

स्वातन्त्र्योत्तरकाले एतेषु त्रिष्वपि पक्षेषु समीक्षणं विहितं विद्वद्भिर्विविधभाषासु। किन्त्वत्र ता एव रचनाः समीक्षिता या संस्कृतभाषायां विद्यन्ते तथा च यत्र काचिद् नवा पाणिनीयशास्त्रप्रवृत्तिर्दृश्यते।

## प्रक्रियाश्रिता रचनाः

**( क ) पाणिनीयप्रबोधः**[1]–श्रीगोपालशास्त्रिदर्शनकेसरिविरचितेऽस्मिन् ग्रन्थे सूत्रेण सहानुवृत्तिरपि प्रदर्शिता। वृत्तावपि ग्रन्थकर्तुः स्वतन्त्रचिन्तनं दृश्यते। वैयाकरणसिद्धान्तकौमुद्यादिग्रन्थेषु 'हलन्त्यमि'ति सूत्रं प्राग् 'उपदेशेऽजनुनासिक इदि'ति सूत्रमनन्तरं पठितम्। पाठेनानेनानुवृत्तिबोधोऽपि सहजतया जायते बालकानाम्। इत्थमेव ग्रन्थकर्त्रा सर्वत्र विशिष्टप्रयोजनेन सूत्राणि विन्यस्य वृत्तिग्रन्थो रचितः। प्रारम्भिकाध्येतॄणां कृते महदुपयोगि पुस्तकमिदम्।

**( ख ) श्लोकसिद्धान्तकौमुदी**[2]–व्याकरणं शुष्कविषय इति प्रसिद्धिः। अत एव सूत्रवृत्तिरटनं कठिनं भवति छात्राणां कृते। तदेव मनसि निधाय विदुषा ग्रन्थकर्त्रा सूत्रार्थः श्लोकबद्धः कृतः। व्याकरणस्य सूत्रार्थावगमनाय स्मरणाय च ग्रन्थोऽयं महदुपयोगी।

**( ग ) उणादिरत्नकौमुदी**[3]–संस्कृते बहवः शब्दा उणादिप्रत्ययैर्निष्पद्यन्ते। यद्यप्यत्र सूत्राणां संकलनं विद्यते तथापि लक्ष्यप्रधानतया ग्रन्थोऽयं प्रक्रियापरक एवेति वक्तुमुचितम्। अत्र सूत्रैः सह वृत्तिरुदाहरणं, रूपसिद्धिः, कोशः तथा चोद्धरणानि प्रदर्शितानि।

**( घ ) ज्ञापकादर्शः**[4]–पाणिनीयतन्त्रे ज्ञापकस्यातीव महत्त्वपूर्णं स्थानम्। त्रिमुनितन्त्रेऽस्मिन् यः या यच्च अर्थापत्त्या किमपि परिभाषारूपं तद्व्यतिरिक्तं वचनं वा ज्ञापयति स सा तच्च क्रमशः ज्ञापकः ज्ञापिका ज्ञापकमित्युच्यते।[5] ग्रन्थेऽस्मिन् ज्ञापकानां विस्तरेणानुशीलनं कृतं ग्रन्थकर्त्रा श्रीमता मणिनाथझामहोदयेन।

**( ङ ) कौमुदीकथाकल्लोलिनी**[6]–अत्र रोचकानां कथानामवलम्बनेन वैयाकरणसिद्धान्तकौमुद्या औणादिकातिरिक्तस्य कृत्स्नस्य प्रकरणजातस्य समग्राणामावश्यकसूत्राणामुदाहरणानि प्राय उपन्यस्तानि। यद्यप्यत्र व्याकरणबोधनाय ग्रन्थकर्त्तुः प्रवृत्तिर्विद्यते तथाप्यत्र नास्ति काव्यकामनीयताभाव इत्यन्यतमं वैशिष्ट्यमस्य ग्रन्थस्य।

**( च ) दुर्गाख्यः टीकाग्रन्थः**[7]–नागेशभट्टविरचितपरिभाषेन्दुशेखरस्य टीकेयम्। सारल्येन विषयस्य प्रतिपादनमस्या वैशिष्ट्यम्।



**( छ ) भावप्रकाशिका टीका**[8]–नाम्नानेन प्रौढमनोरमायाः परमलघुमञ्जूषायाश्च द्वयोरपि ग्रन्थयोष्टीका विरचिता विदुषा जयशङ्करलालत्रिपाठिना। प्रौढमनोरमायाः टीका पञ्चसन्धिपर्यन्तमेव विद्यते। मूलग्रन्थस्य पद-पदार्थविवेचनं सम्यग्रूपेण विहितं टीकाकर्त्रा। परमलघुमञ्जूषायाः टीका सम्पूर्णे ग्रन्थे विद्यते। शोधपूर्णा टीकेयम्। अत्र पदे पदे टीकायां विमर्शो दृश्यते।

**( ज ) बालप्रकाशिका**[9]–द्वारिकाप्रसादद्विवेदिप्रणीतायां प्रौढमनोरमायाष् टीकायामस्यां मूलग्रन्थस्य स्पष्टीकरणं तथा च यत्र तत्र पदपदार्थयोः परिष्कारोऽपि दृश्यते।

**( झ ) राधिका टीका**[10]–टीकेयं लघुशब्देन्दुशेखरस्य पञ्चसन्धि-प्रकरणमाश्रित्य विद्वद्वरेण श्रीब्रह्मदत्तद्विवेदिना सरलया सरसया स्पृहणीयभाषया व्यरचि। टीकाकारेणात्र प्राचीनपरम्परामनुपालयता स्वीयप्रतिभया युक्तायुक्तत्वविचारोऽपि उपस्थापितः, येन टीकेयं विद्वत्सु प्रेरणाभूता शोधपूर्णा च समुपतिष्ठते।

**( ञ ) समासवृत्तिविमर्शः**[11]–पञ्चसु वृत्तिषु समासोऽप्येका वृत्तिः। एतस्याः सर्वाङ्गं विवेचनमत्र विहितमाचार्यविजयप्रसादत्रिपाठिना। समासविषयकपरिष्कारज्ञानार्थं ग्रन्थोऽयमतीवोपयोगी।

**( ट ) कृदन्तरूपमाला**[12]–पञ्चखण्डात्मके ग्रन्थेऽस्मिन्नकारादिक्रमेण धातवः तथा च तेषां कृदन्तरूपाणि ससूत्रं निरूपितानि।

**( ठ ) निपातार्थनिर्णयः**[13]–'उच्चावचेष्वर्थेषु निपतन्तीति निपाता' इति निरुक्तकारमतम्। निपाताः सन्दर्भसापेक्षा अपि भवन्ति। निपातानां प्रसङ्गपूर्वकं विवृतिरेव ग्रन्थस्यास्य प्रयोजनम्।

**( ड ) लिङ्गवचनविचारः**[14]–महावैयाकरणदीनबन्धुझाविरचितेऽस्मिन् ग्रन्थे 82 कारिका वर्तन्ते। एष हि ग्रन्थः पाणिनीयव्याकरणमहाभाष्यप्रदीपप्रदीपोद्द्योतसिद्धान्त-कौमुदीशब्देन्दुशेखरभूषणदर्पणशास्त्रार्थरत्नावलीव्युत्पत्तिवादगूढार्थतत्त्वालोकपदवाक्य-रत्नादिग्रन्थानां लिङ्गसंख्यानिरूपणपरान् भागान् समवलोक्य स्वयं भूयो यथामति विचार्य च तथा सरलप्रणाल्या सम्पादितो यथा लिङ्गवचनविषये सन्देहानपाकरिष्यति ज्ञातव्यविषयाँश्च ज्ञापयिष्यति।[15]

**( ढ ) धातुरूपनन्दिनी**[16]–पाणिन्युक्ता द्विसहस्रं धातवोऽत्र संगृहीताः।

प्रतिधातु सर्वलकाररूपाणि, प्रतिलकारं नवरूपाणि चात्र न दत्तानि। यत्र विशेषः स्याद्, यत्र सन्देहः स्यात् तादृशानि रूपाण्येव दत्तानि। यत्र रूपे विशेषः स्यात् तत्र टिप्पण्यां सूत्राणि दत्तानि। प्रस्तावनायां धातुसम्बद्धा बहवोंऽशा निरूपिताः। परिशिष्टे विशेषांशाः केचन ज्ञापिताः। अन्ते च धातवः अकारादिक्रमेण प्रदत्ताः।

**( ण ) भाषापाकः**[17]–ग्रन्थेऽस्मिन् शिष्याचार्यमाध्यमेन शब्दसाधुत्वं निरूपितम्। शैलीयं प्रारम्भिकच्छात्रेषु व्युत्पत्त्युत्पादनाय महदुपयोगिनी।

**( त ) शुद्धिकौमुदी**[18]–शब्दानां साधुत्वासाधुत्वविषयको ग्रन्थोऽयम्। अत्रेत्थं बहवः शब्दा विवेचिता येषां व्याकरणशास्त्रीया साधुता न विद्यते, किन्तु भ्रमवशाद् जनाः प्रयुञ्जते। इत्थं शब्दापशब्दविवेचकोऽयं ग्रन्थो व्युत्पत्त्यर्थं महदुपयोगी।

**( थ ) उपसर्गार्थचन्द्रिका**[19]–चारुदेवशास्त्रिप्रणीते ग्रन्थेऽस्मिन् उपसर्गार्थाः सोदाहरणं समीक्षिताः। शिष्टप्रयोगा अत्र समीक्षणस्याधारभूताः।

## सूत्रक्रमाश्रिता रचनाः

**( क ) ऋजुपाणिनीयम्**[20]–अष्टाध्यायीसूत्रक्रममवलम्ब्य ग्रन्थोऽयं रचितः पण्डितगोपालशास्त्रिदर्शनकेसरिणा। यद्यप्यत्राष्टाध्याय्याः सर्वाणि सूत्राणि न विद्यन्ते तथापि व्याकरणस्याध्ययनाध्यापनमष्टाध्यायीसूत्रपाठक्रमेणैव स्यादिति धिया ग्रन्थोऽयं रचितः। वृत्तिरटनं विहायानुवृत्तिमवगम्य छात्राः स्वयमेव वृत्तिनिर्माणं कुर्वन्त्विति ग्रन्थस्य प्रयोजनम्। ग्रन्थस्यास्य बृहत् संस्करणमुत्तरप्रदेशसंस्कृतसंस्थानतः प्रकाशितम्।

**( ख ) अष्टाध्यायीसूत्रार्थप्रकाशिका**[21]–महर्षिपाणिनिप्रोक्ताष्टाध्यायीमधिकृत्य विरचितो वृत्तिग्रन्थोऽयम्। ग्रन्थेऽस्मिन् सूत्रवृत्तिः तथा चानुवृत्तपदानां विवरणं तथा चानुवृत्तेरवधिरपि सम्यग्रूपेण निरूपिताः। ग्रन्थान्ते गणपाठोऽपि विद्यते।

**( ग ) ललितावृत्ति**[22]–वृत्तिग्रन्थोऽयं महर्षिपाणिन्यष्टाध्यायीमाश्रित्य रचितः। अत्र प्राचीननव्यव्याकरणपरम्परयोरद्भुतः समन्वयो दृश्यते। अस्यां वृत्तौ सूत्राणां व्याख्यानमष्टाध्यायीपाठक्रमेणैव विद्यते। उदाहरणानां सिद्धौ आवश्यकानां सूत्राणां वार्त्तिकानाञ्च निदर्शनं प्रक्रियाक्रमेण विद्यते। प्रसङ्गप्राप्तानां फिट्सूत्राणां वार्त्तिकानां कारिकाणां प्रत्युदाहरणानाञ्च तत्तत्स्थानेषु समावेशो दृश्यते। सूत्रपाठे प्रतिसूत्रमनुवर्त्यमानस्य



पदस्यावधिसूत्रसंख्यानिर्देशपुरःसरं निर्देशो विद्यते। परिशिष्टभागे गणपाठस्य, अनिट्कारिकाणाम्, सौत्रधातूनाम्, धातुप्रत्ययगतानामनुबन्धानां विचारो विद्यते। इत्थमत्र सूत्रपाठक्रमप्रक्रियाक्रमपक्षौ उभावप्यादृतौ।

**( घ ) हृद्याख्यष् टीकाग्रन्थः**[23]–टीकेयं पाणिनीयशब्दानुशासनस्य गोविन्दझामहोदयेन विरचिता। भट्टोजिदीक्षितकृताया वैयाकरणसिद्धान्तकौमुद्यास्तट्टीकानाञ्च प्रचारेण मन्दीभूतस्याष्टाध्याय्याः पठनपाठनस्य पुनः प्रवर्त्तनमस्याः प्रयोजनम्। अस्यां टीकायां यथावसरम् आधुनिकभाषाविज्ञानविषयकं विवेचनमुपलभ्यते। इत्थं व्याख्यायामस्यां टीकाकारेण पारम्परिकी तथा चाधुनिकी भाषाशास्त्रीयाभिज्ञा प्रदर्शिता।

**( ङ ) पाणिनीयधातुपाठसमीक्षा**[24]–पाणिनीयधातुपाठविषये विलियम्-ड्वाइट्-ह्विट्नी-प्रचारितभ्रान्तमतनिरसनार्थं पाणिनीयधातुपाठसमीक्षाग्रन्थग्रन्थने प्रावर्तत रचयिता। ग्रन्थेऽस्मिन्ननुसन्धित्सूनामुपकाराय ग्रन्थे प्रयुक्तानाम् उद्धरणानां तत्तद्भाषाशब्दानामन्येषां च विविधानां विषयाणां झटिति ज्ञानं स्यादिति धियाऽकारादिक्रमेण भूयांसि परिशिष्टानि संयोजितानि।

**( च ) महाभाष्यनिगूढाकूतयः**[25]–ग्रन्थोऽयं देवस्वरूपमिश्रेण विरचितः। महाभाष्यगतानां निगूढाकूतानां विवरणमेव ग्रन्थकारस्य प्रयोजनम्। चिरात् प्रचलितान् विवादग्रस्तविषयान् समीक्ष्य नावीन्यं प्रत्यपादि ग्रन्थकारेण।

**( छ ) वार्त्तिकप्रकाशः**[26]–काशिकास्थवार्त्तिकानां व्याख्याग्रन्थोऽयम्। अस्मिन् ग्रन्थे 978 वार्त्तिकानां व्याख्या वरीवर्त्ति। ग्रन्थादौ अष्टाध्यायीक्रमेण वार्त्तिकपाठो विद्यते। येषु सूत्रेषु वार्त्तिकानि सन्ति तेषामर्थोदाहरणान्यपि प्रदर्शितानि, येन वार्त्तिकानां प्रसङ्गबोधे काठिन्यं न स्यात्। वार्त्तिकानि च समासार्थोदाहरणरूपसिद्धि-शङ्कासमाधानपुरःसरं व्याख्यातानि। वार्त्तिकाध्ययने ग्रन्थोऽयं महदुपकारी।

## दर्शनाश्रिता रचनाः

**( क ) पाणिनीयव्याकरणे प्रमाणसमीक्षा**[27]–ग्रन्थेऽस्मिन् व्याकरणशास्त्र-मवलम्ब्य प्रमाणानि समीक्षितानि। यद्यपि महाभाष्यवाक्यपदीयभूषणसारलघुमञ्जूषादि-ग्रन्थेषु व्याकरणस्य दर्शनांशो निरूपितः, तथापि तत्र प्राधान्येन प्रमेयांशानां निरूपणात् ग्रन्थोऽयं सर्वथा नवीनायते।

**(ख) अम्बाकर्त्रीटीकाग्रन्थः**[28]–अतिप्रथितं विद्वत्समाजे भर्तृहरिविरचितं वाक्यपदीयम्। अस्य ग्रन्थस्येयमेकैव टीका विद्यते या सम्पूर्णे वाक्यपदीये उपलभ्यते। अन्याः सर्वा अपि टीका आंशिक्यः। टीकायामस्यां टीकाकर्तुर्वेदान्त-दृष्टिरपि परिलक्ष्यते। पदे पदे प्रमाणोद्धरणमस्याः प्रमुखं वैशिष्ट्यम्। प्रत्यभिज्ञादर्शनस्य सिद्धान्तानाश्रित्य रचितासु व्याख्यास्वव्याख्यातात्पव्याख्यातांशा अत्र सम्यग्रूपेण सारल्येन च व्याख्याताः।[29]

**(ग) प्रतिभाटीका**[30]–टीकेयं वामदेवाचार्येण वाक्यपदीयस्य ब्रह्मकाण्डमाश्रित्य विरचिता। सारल्येन विषयस्य स्पष्टीकरणमस्या वैशिष्ट्यम्। अत्र टीकायां वाक्यपदीयस्य समर्थनार्थं महाभाष्यस्य तथा च श्रुतेरुद्धरणं दृश्यते। अत्र केवला व्याकरणशास्त्रीया दृष्टिः परिलक्ष्यते टीकाकारस्येत्यन्यतमं वैशिष्ट्यम्।

**(घ) वाक्यपदीयपाठभेदनिर्णयः**[31]–पाठभेदः संस्कृतवाङ्मयस्य प्राचीनग्रन्थानां महती समस्या। वाक्यपदीयमपि पाठभेदग्रस्तमेव। पाठान्तरस्य निरसनार्थं प्राधान्येन ग्रन्थतात्पर्यमेवाधारभूमिः। ग्रन्थेऽस्मिन् ग्रन्थतात्पर्यसङ्गतिपूर्वकं पाठनिर्णयः कृत आचार्यरघुनाथशर्मणा।

**(ङ) रूपाली टिप्पणी**[32]–बृहद्वैयाकरणभूषणस्य टिप्पणीयं पण्डित मनुदेवभट्टाचार्येण रचिता। इतः पूर्वं बृहद्वैयाकरणभूषणस्य काचिट्टीका टिप्पणी वा न दृश्यते।

बृहद्वैयाकरणभूषणस्याचार्यरामयत्नशुक्लविरचिता विस्तृता टीका फ्रेंच–अध्ययनकेन्द्र–पाण्डिचेर्यां प्रकाशनाधीना विद्यते।

**(च) वंशीटीका**[33]–परमलघुमञ्जूषायाष् टीकेयमाचार्यवंशीधरमिश्रप्रणीता। मूलग्रन्थस्य भावस्य स्पष्टीकरणमेव टीकाया उद्देश्यम्। सारल्येन विषयप्रतिपादनेन टीकेयं प्रसिद्धा विद्वत्सु।

**(छ) भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा**[34]–ग्रन्थेऽस्मिन् तत्तत्सिद्धान्तविषयकं मीमांसकमतं नैयायिकमतं चोद्धाव्य शाब्दिकमतमुद्भावितम्। तत्रापि भूषणसारमतं परमलघुमञ्जूषामतञ्चोपस्थाप्य समीक्षा विहिता ग्रन्थकारेण।

इत्थं वयं पश्यामो यत् स्वातन्त्र्योत्तरकाले शास्त्रार्थीया प्रवृत्तिर्ह्रासतां गता। अत



एव टीकानां मूलग्रन्थस्य स्पष्टीकरणमेव प्रयोजनं दृश्यते। आधुनिकभाषाविज्ञानमाश्रिता प्रवृत्तिरुदिता स्वातन्त्र्योत्तरकाले। प्रक्रियाश्रितायाः प्रवृत्तेराधारभूमिः सूत्रक्रमाश्रिता प्रवृत्तिर्जाता। पाठभेदसमस्यानिरसने तथा च पाश्चात्त्यानामाक्षेपनिराकरणे विदुषां प्रवृत्तिर्दृश्यते।

स्वातन्त्र्यात्प्राक् शास्त्रार्थाश्रिता पाणिनीयशास्त्रप्रवृत्तिरासीत्। तस्मिन् काले रचितग्रन्थेषु पाण्डित्यप्रदर्शनस्य प्रवृत्तिर्दृश्यते ग्रन्थकर्तॄणाम्। इत्थं स्वातन्त्र्योत्तरकालिकी पाणिनीयशास्त्रप्रवृत्तिः समीक्षात्मिका, तुलनात्मिका समन्वयपरा च विद्यते।

❖

## सन्दर्भाः


1. गोपालशास्त्रिदर्शनकेसरी, स.सं.वि.वि., वाराणसी,1996 द्वितीय संस्करणम्।
2. सुरेशझा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1982, प्रथमसंस्करणम्।
3. अर्जुनझा, का.सि.द.सं.वि.वि.,दरभङ्गा, 2001, प्रथमसंस्करणम्।
4. मणिनाथझा, का.सि.द.सं.वि.वि., दरभङ्गा, 2002, प्रथमसंस्करणम्।
5. ज्ञापकादर्शस्यामुखे।
6. रामशरणशास्त्री, चौखम्बा-विद्याभवनम्, वाराणसी, 1989, द्वितीयसंस्करणम्
7. हर्षनाथमिश्रः, श्री ला.ब.के. सं.वि.पी., नवदेहली
8. जयशङ्करलालत्रिपाठी, चौखम्बा-कृष्णदास-अकादमी, वाराणसी, 2011, चतुर्थसंस्करणम् (परमलघुमञ्जूषायाः)। 2006 पुनर्मुद्रणम् (प्रौढमनोरमायाः)।
9. द्वारिकाप्रसादद्विवेदी, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, 2011-12 संस्करणम्।
10. ब्रह्मदत्तद्विवेदी, चौखम्बा-संस्कृत-सीरीज-ऑफिस, वाराणसी, 2008, द्वितीयसंस्करणम्।
11. विजयप्रसादत्रिपाठी, स.सं.विश्वविद्यालयः, वाराणसी, 1991, प्रथमसंस्करणम्।
12. कृदन्तरूपमाला, मद्रपुरी संस्कृतविद्यासमितिः, 1989, द्वितीयसंस्करणम्।
13. हरिश्चन्द्रमणित्रिपाठी, स.सं.वि.वि., वाराणसी, 1990, प्रथमसंस्करणम्।

14. दीनबन्धुझा, सं.श्रीधरत्रिपाठी, मिथिला-विद्यापीठम्, दरभङ्गा,1990,संस्करणम्।

15. लिङ्गवचनविचारस्य प्राक्कथने।

16. जनार्दनहेगडे, संस्कृतभारती, नवदेहली, 2011, प्रथमसंस्करणम्।

17. जनार्दनहेगडे, संस्कृतभारती, बेङ्गलूरु, 2005, प्रथमसंस्करणम्।

18. जनार्दनहेगडे, संस्कृतभारती, बेङ्गलूरु, 2004, प्रथमसंस्करणम्।

19. उपसर्गार्थचन्द्रिका (5खण्डाः), भारतीय विद्या प्रकाशन,दिल्ली,1976

20. गोपालशास्त्री 'दर्शनकेशरी' चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी,2008

21. सुरेश्वरझा, का.सि.द.सं.वि.वि., दरभङ्गा, 2004, प्रथमसंस्करणम्।

22. श्रीसिद्धार्थकृष्णः, कैलास-विद्या-प्रकाशनम्, ऋषिकेशः,2005,प्रथमसंस्करणम्

23. गोविन्दझा, का.सि.द.सं.वि.वि., दरभङ्गा, 2004 प्रथमसंस्करणम्।

24. भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री', सं.सं.वि.वि.,वाराणसी,1984,द्वितीयसं.

25. देवस्वरूपमिश्रः, स.सं.वि.वि., वाराणसी, 1978, प्रथमसंस्करणम्।

26. आनन्दप्रकाशमेधार्थी, चौखम्बा-संस्कृत-संस्थानम्, वाराणसी,1993,प्रथमसं.

27. आचार्यश्रीरामप्रसादत्रिपाठी, स.सं.वि.वि., वाराणसी, 1997, द्वितीयसंस्करणम्।

28. पद्मश्री पण्डितरघुनाथशर्मा, स.सं.वि.वि., वाराणसी, 2006, चतुर्थसंस्करणम्।

29. 'प्रज्ञा' शोध-पत्रिका' का.हि.वि.वि.,वा.,अङ्क-52,आचार्यगोपबन्धुमिश्रस्य निबन्धे।

30. वामदेवाचार्यः, सं.-सत्यनारायणशास्त्री खण्डूडी, कृष्णदास-अकादमी, वाराणसी, 2000, तृतीयसंस्करणम्।

31. रघुनाथशर्मा, स.सं.वि.वि., वाराणसी, 1980, प्रथमसंस्करणम्।

32. बृहद्वैयाकरणभूषणम्, 'रूपाली' टीका, चौखम्बा अमर भारती प्रकाशन, वाराणसी, 1985, प्रथमसंस्करणम्।

33. पण्डितवंशीधरमिश्रः, चौखम्बा-विद्याभवनम्, वाराणसी, 2006, प्रथमसंस्करणम्।

34. आचार्यराममनोहरमिश्रः, स.सं.वि.वि., वाराणसी, 1983, प्रथमसंस्करणम्।

❖



# वैदिकसमाजविधानं जीवनदर्शनं च

डा. विनोद चौधरी

ऋषीणां लोककल्याणपरम्पराणां विविधकल्याणावाप्तये संचितोऽक्षयं ज्ञानं वेदः। अनित्येऽपि संसारेऽस्मिन् सर्वे लोकाः सुखावाप्तिप्रसाधनेषु दुःखपरिहारोपायेषु च व्यापृताः दृश्यन्ते। पुत्रैषणा-वित्तैषणा-लोकैषणेति एषणात्रयरूपेण परिणतोऽयं तेषामायासः। यैरलौकिकैरुपायैः साफल्यं भजेत ते वेदाधिगमेनैव ज्ञातव्या इति वेदशब्दस्यैव व्युत्पत्तिरेव सूचयति। वेदेषु मानवानां कल्याणाय सन्ति देवप्रार्थनाः। मानवजीवने विघ्नानां निवारणोपायश्च तत्र विज्ञानविधयः यज्ञविधानानि काम्यकर्मप्रकारस्तेषां साधनोपायाश्च प्रतिपादिताः सन्ति। येषामनुष्ठानेन मानवः सर्वकामानवाप्नोति। सर्वेषां जीवानामेकः स्वाभिप्रायः नित्यं निरतिशयं च सुखं मे भूयात् मृत्युर्मे मा भवत्विति। समाजस्य विकासस्य सभ्यतायाः समुन्नतेः वर्णानां विविधवृत्तिपराणां नराणां च कर्मकलापस्य सामाजिक्या व्यवस्थायाश्च महत्त्वपूर्णम् इतिवृत्तं वेदेषूपलभ्यते। वैदिकसंस्कृतिः विश्वकल्याणकामनयानुप्राणितः 'पुमान् पुमांसं परिपातुं विश्वतः'। शिक्षयत् विश्वं सुपथमेव दर्शयति आदेशयति च। विचारसहिष्णुता चास्याः संस्कृतेरपरं महत्त्वपूर्णं तत्त्वम्। अधुना वैदिकजीवनदर्शनानुसारेण स्वार्थपरतानिरोधनेन आर्त्तानां साहाय्यं कुर्वन् परोद्धाराय जीवनं सामाजिकं कुर्यात्।

वेदेषु जगतां व्यवस्थायै मानुषाणां कल्याणाय च ब्राह्मणः क्षत्रियः वैश्यः शूद्रः दुस्युश्चेति पञ्च भेदाः प्रतिपादिताः। त एव पश्चाज्जातिरूपेण व्यवहारमवाप्नुवन्। वेदेषु वर्णाः कार्यविभागाय कृताः न तूच्चनीचभेदाय इति। जातिभेदमपहाय मानुषाः मिथः स्नेहेन वर्तेरन्निति वेदोपदेशः-

**प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।**
**प्रियं सर्वस्य पश्यत् उत शूद्र आर्ये॥**[2]

एवमिमे चत्वारो वर्णाः श्रुतिप्रतिपादिताः वेदे समुपदिष्टाः तत्र वर्णकर्तव्यमनुसन्धाय यजुषि च आम्नातम् ब्रह्मणे ब्राह्मणं, क्षत्राय राजन्यं मरुते वैश्यं तपसे शूद्रम् इति।

मरुछब्देन मरुतो व्यापारो व्यपदिश्यते। तपसा सेवाधर्मो निर्दिश्यते। यदा सर्वेऽपि वर्णाः सम्भूय कार्ये स्वधर्मं वाऽनुतिष्ठन्ति तदानीमेव विश्वसमुन्नतिः सम्भवा तथा चाम्नातम्--

**यत्र ब्रह्म च क्षत्रञ्च उभौ संचरतः सह।**
**तं देशं पुण्यं प्रज्ञेयं यत्र देवाः सहाग्निना॥[3]**

इत्यादिभिर्मन्त्रनामलिङ्गैः सर्वेषां वर्णानां सायुज्यं सहसंचारित्वं राष्ट्रोन्नतिमूलकत्वेनोपवर्णितम्। तत्र मानुषाणां भद्राणि कर्त्तव्यानि, हेयानि कार्याणि, लोकव्यवहाराः, जीवनोपायाः, देवोपासना, मिथः पूजाश्च बहुत्र वर्णिताः सन्ति। सर्वं ज्ञातव्यमशेषं कर्त्तव्यं च वर्तते वेदेषु लिखितम्। विश्वमिदं वेदेषु राष्ट्रमेकं गणितम्। राष्ट्रस्य च तस्य रक्षां कल्याणं च पदे-पदे वर्तते प्रार्थितम्।

**ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।**
**ध्रुवं ते इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥[4]**
**भद्रमिच्छन्तः ऋषयः स्वविर्दस्तो दीक्षामुपनिषेदुरग्रे।**
**ततो राष्ट्रं बलमोजश्च जातं तस्मै देवाः उपसंनमन्तु॥**

वैदिकसंस्कृतिस्तु विश्वबन्धुत्वभावनयानुप्राणिता। एषा उदात्तभावना वैदिकसंस्कृतेर्गौरवं सूचयति, ऋषीणाञ्च उदारतां बोधयति। अनया भावनया विश्वशान्तिसुखमधिगन्तुं शक्यते। विश्वशान्तेः विश्वबन्धुत्वस्योदात्तभावनायाः निदर्शनं विश्वमानवतावादस्य दृष्टान्तः मन्त्रेऽस्मिन् अवलोक्यते--

**मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।[5]**

तथा च- **संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथापूर्वे संजानाना उपासते॥[6]**

अपि च- **समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति॥[7]**

अर्थात् सर्वे मनुष्याः धर्मनीतिसंयुक्ता भवेयुः। विरोधं विहाय सर्वसौख्यसम्पन्नमूलां संघशक्तिं समाश्रयत। सर्वे प्राणिनः अस्माकमनुकूला उपकारका मित्राणि च भवेयुः हितमेव चिन्तयेयुः सुखमेव समर्पयेयुः। अन्यभागहरणं स्वभागहरणायैव भवति, कृतानुकरणस्य लोकस्वभावसिद्धित्वादिति परिज्ञाय स्वभागरक्षणायान्यभागहरणं कदापि न कर्त्तव्यम्। यथा देवाः परम्परमैकमत्यं प्राप्ता यज्ञे स्वकीयमेव हविर्भागमाददते नान्यदीयं हविर्भागं लिप्सन्ते।



वैदिकसाहित्ये विविधभाषाभाषिणः विविधवृत्तिप्रवृत्तिपराः च जनाः सांस्कृतिकैकतायाः अवलम्बनेन विविधतायाम् एकताम् अभिव्यञ्जयन्तः संयुक्त-कुटुम्बिनः इव सामरस्य-विजृम्भितं जनजीवनं कुर्वन्ति स्म इति चित्रम्–

**जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्।**
**सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ति॥**
(अथर्ववेदः 12.1.45)

अथर्ववेदे दृश्यताम्–

**सहृदयं सामनस्यं विद्वेषं कृणोमि वः।**
**अन्यो अन्यमपि हर्यत जातं वत्समिवाध्न्या॥[8]**

मन्त्रेऽस्मिन् सामञ्जस्यं द्वेषाभावः पारस्परिकसहायोगस्य एकलक्ष्यतायाश्चोपदेशः प्राप्यते। गौर्यथा स्निह्यति तथैव पारस्परिकं सौहार्दं स्यात् एवम् एवोद्देश्यत्वे सति समानोन्नतिः राष्ट्रोन्नतिश्च संपत्स्यते।

वैदिकसंस्कृतिः त्यागभावमुपदिशन्ती मानवमात्रायाभयं ददाति। प्रत्येकं मनुष्याधिकारस्य रक्षां करोति।

**मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य।**
**नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी॥[9]**

वैदिकसंस्कृतिः त्यागस्य महत्त्वं प्रतिपादयति, त्यागभावेनैव भारतीयवर्णाश्रम-धर्मव्यवस्था समाजमनुशास्ति। संसारस्य भोगः त्यागभावेन एव समुचितः।

**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।[10]**

वैदिकसंस्कृतेरपरमाधारभूतं तत्त्वमध्यात्मवादः। अशेषविश्वोऽयं ईश्वरेणाभिव्याप्तः। अतः ईश्वरस्य महत्त्वं स्वीकार्यम्। तद्यथा यजुर्वेदे-

**ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत्।[11]**

वैदिकसंस्कृतेरन्यः आधारः कर्मवादः। कर्माणि कुर्वतामेव इह संसारे जिजीविषा वैदिक ऋषीणां परिलक्ष्यते।

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः॥[12]**

वैदिकसंस्कृतौ निष्कर्मण्यता पापमभिशापश्च। आत्मविश्वासपूर्वकं जीवनोपयोगः वैदिकसंस्कृतेरादर्शः-

**असूर्य्या नाम ते लोका अन्धेन तमसावृत्ताः।**
**तांस्ते प्रेत्यभिगच्छन्ति ये के चात्महनो जनः॥[13]**

वैदिकऋषयः नैतिकमार्गस्य उन्नतिशीलस्य जीवनस्य कामनां कृतवन्तः। अन्यायमत्याचारं च विरोद्धुं सततं संघर्षोऽनुष्ठीयते। अथर्ववेदे उक्तिरियम्–

**शतेन पाशैरभि धेहि वरुणैनं मा ते मोच्यनृतवाङ्नृचक्षः।**

**आस्ता जाल्म उदरं स्रंसयित्वा कोश इवा बन्धः परिकृष्यमाणः॥**[14]

पुनर्जन्मवादसिद्धान्तेन प्रेरितः मनुष्यः अयमेव लोकः न, परः अपीति विचारयन् सदाचारमनुपालयन् चरित्रं रक्षति आदर्शजीवनं यापयतीत्यस्मात् समाजे नैतिकतत्त्वानां विकासो भवति। एवं सत्यम्, ऋतम्, दीक्षा, तपः, ब्रह्म, यशः चेति षडंशा भवन्ति राष्ट्रस्य आधारभूताः।

❖

## सन्दर्भाः


1. ऋग्वेदः 6.75.14
2. अथर्ववेदः 19.62.1
3. यजुर्वेदः 20.25
4. ऋग्वेदः 10.173.4
5. यजुर्वेदः 36.18
6. ऋग्वेदः 10.191.2
7. ऋग्वेदः 10.191 4
8. अथर्ववेदः 3.30.1
9. ऋग्वेदः 10.117.6
10. यजुर्वेदः 40.1
11. यजुर्वेदः 40.1
12. यजुर्वेदः 40.2
13. यजुर्वेदः 40.3
14. अथर्ववेदः 4.16.7


❖